९८९

Almira 2
Shelf 2
32

अपरिचित
३०८६

३०-२/५

जापकमण्डलम

२०५५

॥ श्रीगणेशाय नमः ॥ ॥ नत्वा देवं गणेशं च श्रीमहेशं गणाधिपम् ॥ नंदिकेश्वरसंज्ञोहं वक्ष्ये गणमराडनं ॥१॥ अश्विनी भरणी चैव कृ-
त्तिका रोहिणी मृगः ॥ आर्द्रा पुनर्वसुः पुष्यो श्लेषा चैव मघा तथा ॥२॥ पूर्वाफोत्तरफा हस्त चित्रा स्वाति विशाखिका ॥ राधा ज्ये-
ष्ठा च मूलं च पूर्वाषाढोत्तरा तथा ॥३॥ अभिजिच्छ्रवणश्चैव धनिष्ठा शततारका ॥ पूर्वभाद्रोत्तराभाद्रे चांत्यमं भं तु रेवती ॥४॥ उत्तरा-
षाढपादोंत्यश्चा द्युतिथ्यंशकश्रुते ॥ अभिजिद्भाग इत्येषां ज्ञेयो वेधागलादिषु ॥५॥ लांगले कमठे चक्रे फणिचक्रे त्रिनाडिके
॥ अभिजिद्गणना नालिचक्रे स्वार्जुरिके तथा ॥६॥ इति नक्षत्राणि ॥ दस्रो यमाग्निधात्रींदुरुद्रादित्युरगाः ॥ पितृयोन्यर्यमा-
दित्यात्वाष्ट्रवायवींद्रवह्निकं ॥७॥ मित्र इंद्रश्च रक्षोंभो विश्वेदेवा विधिर्हरिः ॥ वसवं तु पाजपात्स्याहिर्बुध्न्यपूषेति ऋक्षेशा ॥८॥ इति न-
क्षत्रेशाः ॥ अ इ उ ए ऽ भिमे वर्णा ओ वा वि वू विधिः स्मृताः ॥ वे वो क कि मृगर्क्षेषु ः कु घ ङ छ आर्द्रके ॥९॥ के को ह हि पुन-
र्वसौ हु हे हो डा च पुष्यभे ॥ सार्पभे डि डु डे डोः सुर्भ मि मु मे मघासु च ॥१०॥ मो टा टि टु तु पूर्वाफा टे टो प पि उत्तरासु च ॥ हस्ते पु
ष ण ठौ चैव त्वाष्ट्रे पे पो र रि स्मृताः ॥ रू रे रो ता स्वातौ ती तु तु ते विशाखिके ॥ न नि नु ने त्वनुराधायामैंद्रे नो या यि यु स्तथा ॥
११॥ ये यो भ भि त्वथा मूले पूर्वाषाढे भु धा फ ढा ॥ भे भो ज जि उत्तराषाढे जु जे जो जाभिजित्तु च ॥१२॥ श्रवणे खि खु खे खाः सु
गं गि गु गे तु वासवे ॥ गो सा सि सु शततर्क्षेषु से सो द दि त्वजांघ्रिभेः ॥१३॥ दु थ झ ञ त्वोत्तराभाद्रे पो दे दो च चि कि कमानि ॥ तु चे चो

राम

लाश्विभेवर्णा लिलुलेलोभरणवपि॥ १५॥ इत्यवर्गहोड चक्रं॥ नवभिर्नवभिः पादैर्मेषाद्याराशयोश्विभात्॥ स्वरादौ ङञणास्या
नैविज्ञेयाघकटाः क्रमात्॥ १६॥ मेषोक्षामिथुनः कर्कसिंहकन्यातुलालयः॥ धन्वीचमकरकुंभोमीनाख्योराशयः स्मृताः॥
॥ १७॥ देशग्रामे गृहेयुद्धे सेवायां व्यवहारके॥ नामराशेः प्रधानत्वं जन्मराशेरतः परं॥ १८॥ अज्ञातजन्मभेकार्या नामभे परिक
ल्पना॥ राशिकूटादिकं सर्वं दंपत्योश्चिंतयेत्सदा॥ १९॥ ज्ञेयाश्चरस्थिरद्विस्वभावामेषादिराशयः॥ क्रमात्तेषां चराशीनां क्रू
राक्रूरौ नरस्त्रियौ॥ २०॥ पृष्ठोदया वृषामेषकर्किचापमृगास्तथा॥ शेषाः शीर्षोदया ज्ञेया मीनः स्यादुभयोदयः॥ २१॥ द्विपदाख्यास्तु
ला कन्याप्राग्धनुर्द्धयुग्मान्विताः॥ वृषाजसिंहधन्वर्द्धं मकरार्द्धं चतुष्पदाः॥ २२॥ कीटः कर्कटराशिः स्याद्वृश्चिकस्तु सरीसृपः॥
मकरस्योत्तरार्द्धं तु कुंभमीनौ जलोद्भवौ॥ २३॥ द्विपदाख्याः सदा ग्राम्यास्तथारण्याश्चतुष्पदाः॥ ग्रामारण्या वृषाजालिधनुःपश्चापरा
र्द्धकं॥ २४॥ इति राशिभेदाः॥ ॥ सर्वेग्रहाः शुभालाभे॥ खे १० र्कः क्रूरास्त्रि ३ षष्ठ ६ गाः॥ आसुताष्टनवास्तेषु कविर्ज्ञोस्ते विनाशकृत्
॥ २५॥ नवपंचद्व्यगो धीज्यशुक्रौ ङ्गौ द्विपंचगः॥ सर्वदादौ शुभदस्थ्यं द्रू आद्यचद्र खत्रिसप्तमः॥ २६॥ इति गोचरफलं॥ राशौ राशौ गु
रुस्तिष्ठेन्नूनं मासास्त्रयोदश॥ स्थूलभुक्त्यानुसारेण षट्त्रिमासाः शनिस्तथा॥ २७॥ मासं शुक्रो बुधश्चार्द्धं सपाद द्विदिनं शशी॥
कुजस्त्रिपक्षं चावक्रीतमोष्टादशमासकान्॥ २८॥ युगांद्र ४ सूर्ये दिनमेकं १ चंद्रे भौमे खनेत्रे २० नवमं ९ बुधे च॥ खागेंडमंत्रेकु द
शो ११ बशुक्रः खखाब्धि ४०० मंदः खजिने २४० भ्रराहुः॥ २९॥ एवं विधेभ्यो विदधीरान क्षत्रभुक्तिः कथिता ग्रहाणां॥ इति ग्रहनक्ष

तथी

न्नराशिस्थितिः॥ प्रियंगुद्विनिशामांसी कुष्टजालेंदु सर्षपैः॥ सांबुलोध्रवचैः स्नानं ग्रहपीडाहरं शुभं॥ ३०॥ इति ग्रहस्नानं॥ धेनु
:शंखो हरणो गौश्च कांचनं पीतवस्त्रकं॥ सितोश्वश्चासिता धेनुर्लोहाजा दक्षिणा रवेः॥ ३१॥ शंखं चंद्रे विरुद्धे चलवणांतार
कासु च॥ तंडुलांश्च तिथौ दद्याद्धान्यं करणवारयोः॥ ३२॥ गां च दद्यात्तथा राशौ कनकं नाडिकासु च॥ योगे चलवणं तद्रूकर्म
णात्ययिकं सदा॥ ३३॥ इति सूर्यादीनां दक्षिणा॥ त्रिषट्दशायांश्रेष्ठं स्वराशेर्ग्रहणां सदा॥ मध्यं द्विसप्तगो स्वस्थं रिष्फाष्टाद्या
स्त्रिगेनेसतः॥ ३४॥ इति ग्रहणाफलं॥ दशाहं कृष्णपक्षाद्योताराबलमतः परं॥ सदा चंद्रबलं ग्राह्यं सर्वमंगलकर्मसु॥ ३५॥ इ
तिताराज्ञयोर्बलं॥ शुक्लाशुक्लादिसद्दृष्टे चंद्र पक्षौ शुभाशुभौ॥ व्यत्यये चाशुभौ प्रोक्तौ संकटे ज्ञबलं विदं॥ ३६॥ इति पक्षबलं
॥ जन्मभाद्दिनभं यावन्नवशेषे च तारकाः॥ पंचसप्तत्रिगा नेष्टा मध्यमाजन्मार्स्वेनाइमाः॥ ३७॥ सत्तारया शशी शस्तो ऽज्ञवीर्येणार्क
संक्रमः॥ भौमादयोर्कवीर्येण दुष्टा अपि शुभप्रदाः॥ ३८॥ इति चंद्रताराबलं॥ धन्वसिंहोलिभे वक्रसुलाभः कन्यकातुले॥
दक्षिणाभ्युदितो मूले हषे मेषे परे समः॥ ३९॥ इति चंद्रोदयाकृतिः॥ ॥ जन्मपंचग्रहानेत्र रसदिक्वह्निपर्वताः॥ वेदाष्टरुद्रसू
र्याश्च कालचंद्रमजादितः॥ ४०॥ युद्धे चैव विवादे च मृगयागमने पुच। वाहने राजसेवायां कालचंद्रं विवर्जयेत्॥ ४१॥ इति कालचं
द्रः॥ वह्न्यब्जजांबिकेभास्यनागस्कंदार्कशंकराः॥ दुर्गायमोस्तुतो विष्णुः स्मरोशेंदु तिथीश्वराः॥ ४२॥ इति प्रतिपदादितिथिपतयः॥

| नंदा | भद्रा | जया | रिक्ता | पूर्णा |
|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ |
| ६ | ७ | ८ | ९ | १० |
| ११ | १२ | १३ | १४ | १५ |

नंदाभद्राजयारिक्तापूर्णाः स्युस्तिथयः क्रमात्॥ शुक्लेकनिष्ठमध्येष्टाः कृष्णेवेष्टाशुभमध्यमाः॥४३॥ इति नंदादिसंज्ञा॥ हस्तश्चैवोत्तरामूलं वसुपुष्याश्विरेवती॥ प्रतिपच्चाष्टमीतद्वन्नवमी च शुभा रवौ॥४४॥ भरणीभास्करेत्याज्या विशाखा त्रितयं तथा॥ सप्तमी चैकादशी षष्ठी द्वादशी च चतुर्दशी॥४५॥ श्रवणो रोहिणी पुष्येनुराधा च मृगास्तथा॥ द्वितीया नवमी ज्ञेया सदा सोमदिने शुभा॥४६॥ सोमे नेष्टा विशाखा च चित्राषाढाद्वयं तथा॥ सप्तमी द्वादशी तद्वदेकादशी त्रयोदशी॥४७॥ मृगाश्लेषोत्तराभाद्रमूलं चैवाश्विनीद्वयं॥ त्रयोदश्यष्टमी षष्ठी तृतीया च शुभा कुजे॥४८॥ भौमे चार्द्रोत्तराषाढा धनिष्ठा त्रितयं तथा॥ जया प्रतिपदं चैव सप्तम्येते कुयोगकाः॥५०॥ बुधे त्याज्यं सैंद्रमूलं धनिष्ठा रेवतीत्रयं॥ तिथयः स चतुर्दश्यो नवमी प्रतिपत्तथा॥ हस्तो मैत्रं द्विदैवाश्विभगापोस्यादितित्रयं॥ गुरुवारे सदाश्रेष्टं पूर्णा चैकादशी तथा॥ कृत्तिकोत्तरफाल्गुण्यो वारुणं रोहिणीत्रयं॥ षष्ठ्यष्टमी चतुर्थी च भद्रा त्याज्या सदा गुरौ॥५३॥ हस्तो मैत्रं भगादित्यं वैश्वपौष्णद्वयं तथा॥ सदा त्रयोदशी नंदा भृगुवारे शुभावहाः॥५४॥ त्याज्या पुष्यत्रयं ज्येष्ठा रोहिणी च मृगो सदा॥ तिथयः सप्तमी रिक्ता द्वितीया च तृतीयका॥५५॥ रोहिणी पूर्वफाल्गुन्यो स्वातिः शतभिषा मघा॥ स्तुतिश्च शुभदा मंदे रिक्ता चैवाष्टमी तिथिः॥५६॥ रेवती चोत्तराषाढा उत्तराफाल्गुनीत्रयं॥ षष्ठी पूर्णा तिथिश्चैव शनिवारे सदात्यजेत्॥५७॥ चतुर्थ्येकैच षष्ठीदौ नेष्टा पंचनगौ कुजे॥ नवम्यार्क्ये सितेष्टा शेशनावेकादशी तथा॥५८॥ विवाहे गुरुसुष्यं च प्रयाणे

शनिरोहिणी ॥ भौमाश्विनीप्रवेशे च गृहारंभे विवर्जयेत् ॥ ५९ ॥ हस्तार्कयोश्च पंचम्यां षष्ठ्यां वै मृगसोमयोः । भौमाश्विन्योश्च सप्तम्याम
ष्टम्यां बुधमैत्रयोः ॥ ६० ॥ पुष्यगुर्वोर्नवम्यां च दशम्यां भृगुपौष्णयोः ॥ एकादश्यां तु धात्र्यर्की योगो यं विषसंज्ञकः ॥ ६१ ॥ उपग्र
हास्तथानंदादयो योगा भवंति ये ॥ ग्रंथविस्तारभीत्यात्र नोक्ता ग्राह्यास्तु येन्यतः ॥ ६२ ॥ सूर्यभाद्वेदगोतर्कदिग्विश्वनखसम्मिते ॥
चंद्रर्क्षे रवियोगाः स्युर्दोषसंघविनाशकाः ॥ ६३ ॥ कुयोगाः सिद्धियोगाश्च द्वावेतौ भवतो यदि ॥ कुयोगो निर्बलस्तत्र सिद्धि
योगो बली भवेत् ॥ ६४ ॥ अयोगास्सबले लग्ने शस्तेंदौ च शुभांशगाः ॥ केचिद्यामोत्तरं चान्ये यात्रायामेव निंदितान् ॥ ६५ ॥
इति वारभजा योगाप्ययोगाः ॥ ॥ कुलिकः कालवेला च कंटकश्च रववारतः ॥ द्विघ्नेक्षणः क्रमान्मंदे त्वारे जीवो विधु
निशि ॥ ६६ ॥ इति वारजाः कुमुहूर्तार्द्धयामकाः ॥ ॥ तिथयः पक्षरंध्राख्या वेद४र्त्व६र्को१२ष्ट८ वाजिनः १४ ॥ नाड्यस्त्याज्या
ः क्रमादाशुनवे९शें११न्द्रा१४ष्टि४तत्त्व२५गाः ॥ ६७ ॥ इति पक्षरंध्रतिथयः ॥ गंडांतस्त्रिविधस्त्याज्यः शुभे भतिथिलग्नजः ॥ नव
९पंच५ चतुर्थांते ऐवह्नेकार्द्धनाडिकाः ॥ ६८ ॥ इति दग्धातिथयः ॥ ॥ तिथयस्त्वेकवारे चेत्तिस्रः स्युः सावमा तिथिः ॥
तिथिर्वारत्रये व्येका साधिका द्वे च निंदिते ॥ ६९ ॥ इति तिथिक्षयावमवृद्धिः ॥ खाक्षा५० जिना२४ तत्त्वाग्ने३० श्च खाब्धे४० रिंद्राश्व
त्कुपक्षतः २१ ॥ खाग्ने३०र्नखा२० दन्ता३२ स्तत्त्वाग्ने३०र्नखा२० दशाष्टादश१८ नताः ॥ ७० ॥ कुदस्रा२१ द्विशते२० खेंदो१० रिंद्राश्च

3
३

१५
त्वेंदो१० श्वजर्द्दशात्॥ षट्पंचतो ५६ जिना २० द्विशा २० द्विग्म्यो १० दिग्भ्यः १० स्मृते १८ र्नृपा त्र१६॥७१॥ जिना २४ श्चाब्धो मरामा
३० स्त्रयाना द्यः परतः स्थिता॥ दस्रादीनां क्रमाद्दुष्टा श्वत स्त्रो ४ विषनाडिका॥७२॥ इति दस्रादीनां विषनाडिकाः॥ तृतीया
माधवे शुक्ले कार्त्तिके नवमी सिता॥ भाद्रे त्रयोदशी कृष्णा माघे दर्शो युगादयः॥ त्रेता युगा तृतीया च कृते तु नवमी स्मृता॥ कलौ
त्रयोदशी प्रोक्ता दर्शस्तु द्वापरे तथा॥७४॥ पृथग्गोतास्तु संपूज्या विस्त्रीशपित्तवेधसः॥ दानं देयं च लवणं तिलं गौ कांचनं क्र
मात्॥७५॥ इति युगादयः॥ तृतीया पौर्णिमा चैत्रे ज्येष्ठे फाल्गुन पूर्णिमा॥ दशमी पौर्णिमा षाढे त्तृतीया भाद्र एव च॥७६॥
आश्विने नवमी तद्वद्द्वादशी पौर्णिमोर्ज्जके॥ पौषे चैकादशी सम्यक् माघमासे च सप्तमी॥७७॥ एता मन्वादयः शुक्ला श्राव
णे वहुलाष्टमी॥ दर्शश्चैत्यपराः कृष्णाः शुक्लाः पूर्वाह्णिकाः शुभाः॥७८॥ इति मन्वादयः॥ अमार्कपातश्रवणायुक्ता चेत्पौ
ष माघयोः॥ अर्द्धोदयः स विज्ञेयो दाने सूर्यग्रहाधिकः॥७९॥ इत्यर्द्धोदयः॥ गुरुशुक्रवुधेंदूनां वाराः सर्वार्थसिद्धिदाः॥ भा
नुभौमार्कि वारेषु प्रोक्तमेव प्रसिद्ध्यति॥८०॥ रक्तवर्णो रविश्चंद्रो गौरो भौमस्तु लोहितः॥ दुर्वावर्णो वुधो जीवः पीतः श्वेतस्तु
भार्गवः॥८१॥ कृष्णः सौरिः स्ववारेषु स्वस्ववर्णा क्रिया शुभा॥ वारा रव्यादयो ज्ञेयाः स्वदेशेऽर्कोदयात् सदा॥८२॥ इति वारक्रि
या॥ सदा रात्र्यर्द्धमानेन नाडीपंचदश क्षिपेत्॥ स्वप्राग्देशांतरं कुर्याद्रेखातः पश्चिमे हरणं॥८३॥ इति कालहोरा॥ षष्ठीतैले

ष्टमीमांसे क्षौरकार्ये चतुर्दशी। स्त्रीसेवने त्वमावास्यामायुःकामो विवर्जयेत्॥८४॥ वारप्रवृत्तेराम्यनाडीसार्द्धद्वयेन तु। स्वामित्वे
कालहोरायां षष्ठे षष्ठे दिनाधिपात्॥८५॥ संक्रमे वैधृतौ पातेष्टम्यां विष्ट्यां च पर्वणि॥ षष्ठ्यर्कभूमिजेभ्यंगं यत्नेन परिवर्जयेत्॥
॥८६॥ प्रतिपद्दर्शषष्ठीषु संक्रमेर्थे शुभार्थिनः॥ उपवासे क्षयाहे च न कुर्याद्दंतधावनं॥८७॥ श्रीकामा यां त्रयोदश्यां दशम्यां
भोगमंजनं॥ सुतद्रव्याभिलाषी च यत्नेन परिवर्जयेत्॥८८॥ श्रीकामः सर्वदा स्नानं कुर्यादामलकैर्नरः। नवम्यां चैव सप्तम्यां दर्शे
तु परिवर्जयेत्॥८९॥ इति तिथिवारादौ कृत्यनिषिद्धं॥ ॥इति श्रीमद्वेदांगरायात्मजनंदिकेश्वरविरचिते गणकमण्डने नक्षत्र
संज्ञादिप्रथमोऽध्यायः॥ ॥विष्कुंभः प्रीतिरायुष्मान्सौभाग्यः शोभनस्तथा। अतिगण्डः सुकर्मा च धृतिः शूलं तथैव च॥१॥ गण्डो
वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा॥ वज्रं सिद्धिर्व्यतीपातो वरीयान्परिघः शिवः॥२॥ सिद्धिः साध्यः शुभः शुक्लो ब्रह्मा चेन्द्रोथ
वैधृतिः॥ स्वनामसदृशं दद्युः फलं योगाः शुभाशुभं॥३॥ कृत्स्नविष्कुंभयोस्तिस्रो व्याघाते नव नाडिकाः॥ गण्डातिगण्डयोः षट् च शूले पंचा
दिमास्त्यजेत्॥४॥ परिघस्य तु पूर्वार्द्धं सकलौ पातवैधृती॥ साध्यहर्षणमूलानां गण्डयोरंतिमं त्यजेत्॥५॥ दुष्टयोगेर्कभादिंदुः साभि
जिद्विषमर्क्षगः। स्यात्तदैवार्गलो योगो निंद्योसौ शुभकर्मणि॥६॥ वृद्धियोगात्तृतीयेंशे शिष्टेथ ब्रह्मयोगगते। त्रिंशे च सांप्रतं ज्ञेयः क्रां
तिसाम्यस्य संभवः॥७॥ क्रांसंतरं रवींद्वोश्च त्रयस्त्रिंशत्कलादिकं। तत्तदा क्रांतिसाम्यस्य न दोषः शुभकर्मणि॥८॥ कृत्स्न भुक्ते हि

A

गम:
४

तीयेर्द्धे शकुनिर्दर्शे भागयोः। क्रमाच्चतुष्पदं नागं किंस्तुघ्नं प्रतिपद्दले॥ १०॥ चतुर्थ्येकादशी रात्रौ शुक्लतिथ्यष्टमी दिवा। विष्टिस्त्रि
दशमी रात्रौ कृष्णे भूतस्वरौ दिवा॥ ११॥ दुर्गापूजा सदा नेष्टघातादिक्रूरकर्मणि॥ खराश्वप्रसवे भद्रा नान्यत्र शस्यते॥ १२॥
अतीवावश्यकार्ये च पराधीने कदाचन॥ भद्रायां विपरीतायां न दोषः कार्यसाधने॥ १३॥ मानिसार्द्धाद्र्यः सूर्याः सार्द्धगोलाः क्र
मोत्क्रमाः॥ विष्टेः सितासितपुच्छमाभ्यो नाडीत्रयः परः॥ १४॥ दिवाभद्रासु सर्वासु विष्टिपुच्छे ध्रुवं ४ ८ ११ १५ ३ ७ १० १४
जेयः॥ रात्रिभद्रासु नो श्रेष्ठं पुच्छं तच्छुभकर्मणि॥ १५॥ सिंहालिकुंभमीनस्थे चंद्रे मेदा २७ ४ १२ १९ १९ १२ ४ २७ क्षिति
तौ स्थिताः मेषाच्चतुष्टये स्वर्गे शेषे पातालवासिनी॥ १६॥ इति भद्रावासः॥ तिथिरेकगुणोपेता नक्षत्रं च चतुर्गुणं वारश्चा
ष्टगुणः प्रोक्तः करणं षोडशान्वितं॥ १७॥ त्रिंशद्गुणान्वितो योगस्तारा षष्टिगुणान्विताः। चंद्रः शतगुणो लग्नं सहस्रगुणमु
च्यते॥ १८॥ लग्नाद्भावास्तनुर्वित्तं भ्रातृमातृसुतादयः॥ स्त्री मृति धर्म कर्माय व्ययाश्चिंसा बुधैः क्रमात्॥ १९॥ लग्नंतुर्यास्तखं केंद्रं
त्रिकोणं नवपंचमं॥ केंद्रात्परं पणफरं तस्मादापोक्लिमं मतं॥ २०॥ तनुर्मूर्त्युदयं लग्नं नवमं धनभाग्यभं॥ धनं वक्त्रं कुटुंबाख्यं द्वि
तीयं परिकीर्त्तितं॥ २१॥ सुहृद्बुहिबुकपाताले सुखसंज्ञं चतुर्थकं॥ युनास्तमदजामित्रं कामाख्यं सप्तमं स्मृतं॥ २२॥ मेषूरणा
स्पदं मध्यं कामाख्यं दशमं स्मृतं॥ अष्टमं कष्टरंध्रे च रिष्फसंज्ञं व्ययं स्मृतं॥ २३॥ धीः पंचमं तृतीयं च दुश्चिक्यं विक्रमं तथा॥

वृ मि क सिं क तु वृ ९ म कुं मी
२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

उच्च सू चं मं बु बृ शु श

उपचर्याख्रिखोर्याख्यास्त्रित्रिकोणंनवात्मयं ॥२४॥ कुजशुक्रज्ञचंद्रार्कौबुधशुक्रमहीसुताः । गुरुमंदार्कीजीवाख्यामेषादीनामधीश्वराः ॥२५॥ उच्चान्यजोवृषोमकरः कन्याकर्कोऽझषस्तुला ॥ सूर्यादीनांचराहूच्चं मिथुनंकन्यकागृहं ॥२६॥ दिगग्निमनुतिथ्यक्षभनखांशैः परोच्चता ॥ खेटस्यात्तत्रगंनीचंप्रोक्तांशैःपरनीचता ॥२७॥ तृतीयेदशमेपादंद्विपादंनवपंचमे ॥ वेदाष्टमेत्रिपादंहि पूर्णंपश्यत्यगोग्रहान् ॥२८॥ तृतीयेदशमेमंदो जीवः पूर्णंत्रिकोणगः । कुजोवेदाष्टमंपश्येच्छेषाः पश्यंतिसप्तमे ॥२९॥ क्षीणेंद्वर्कार्किभौमाःस्युः पापाः सौम्योपितद्युतः ॥ शिष्यगू अपिपापौतुशेषाः सौम्यग्रहाः स्मृताः ॥३०॥ स्वस्वामिशुभसंयुक्तोभावः सौम्योपिसत्फलः ॥ कष्टदः क्रूरदृग्युक्तोनिःफलोदृष्टिवर्जितः ॥३१॥ लग्नेशोस्तेरिभेनीचेवक्रेचाष्टारिरिष्फगे ॥ लग्नाष्टौत्यारिगे चंद्रेलग्नंदुष्टफलंवदेत् ॥३२॥ इतिलग्नफलं ॥ स्थिरभेकर्कटेचादौ पुण्यकालोर्कसंक्रमात् ॥ द्विस्वभावेमृगेचांत्येमध्येस्याच्चरतुलाजयोः ॥३३॥ रात्रिपूर्वदलेपूर्वदिनार्द्धमपरेपरं ॥ पापाः सन्निहितानाड्यस्तास्ताः पुण्यतमाः स्मृताः ॥३४॥ संपूर्णोचार्द्धरात्रेचेद्यदासंक्रमतेरविः ॥ तदादिनद्वयंपुण्यंमुक्त्वामकरकर्कटौ ॥३५॥ धन्विराशिपरित्यज्यमकरंयातिभास्करः ॥ प्रदोषेचार्द्धरात्रेवातदाभोगःपरेहनि ॥३६॥ त्रिंशत्कर्कटसंक्रांतौपूर्वतःपुण्यनाडिकाः ॥ मकरेतूत्तराःपुण्याश्चत्वारिंशत्कलाः स्मृताः ॥३७॥ संक्रांस्तूत्तरभागिन्योयदिस्युर्भोगिनीमुखे ॥ तदापूर्वदिनेपुण्याः स्नानादौमकरंविना ॥३८॥ मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशुमालिनः ।

प्रभाते चार्द्धरात्रे वा न दा पुण्यं तु पूर्वतः ॥ ३९ ॥ शुभेर्कसंक्रमाद्यं ते नृपनाशश्च निंदिताः ॥ अर्कस्य संक्रमः प्रष्ठे विशाखाश्वदितिर्द्ध्रुव
॥ ४० ॥ ज्यं तु पेशाद्रिया स्यंद्रे वायौ नेऋ परे समाः ॥ श्रेष्ठश्रेष्ठं समे साम्यं नेष्टं नेष्टं समर्घके ॥ ४१ ॥ सुप्तोर्कसंक्रमे नागे तैतिले च च
तुष्पदे ॥ विनिष्टो वणिजे विष्टयां वालवे च मृगो गरे ॥ ४२ ॥ ऊर्द्धस्थितस्त्वशकुनौ किंस्तुघ्ने कौलवे तथा ॥ फलं कनिष्टमध्येष्टं क्रमा
द्धान्यार्घवृष्टिषु ॥ ४३ ॥ चंद्रोर्कमप्लं याति पश्चात्संक्रमते रविः ॥ यदा तदाधिमासः स्यात्क्षयमंगलनाशकृत् ॥ ४४ ॥ ऋतवः षट्
क्रमात्ज्ञेया मृगात्काद्राशिपूर्वतः ॥ शिशिरश्च वसंतश्च ग्रीष्मो वर्षा शरद्धिमः ॥ ४५ ॥ तुलाजसंक्रमात्स्यद्धुगोलौ सौदक्षिणोत्तरौ
॥ सौम्यायनं मृगात्षड्कं कर्काद्याम्यायनं तथा ॥ ४६ ॥ इति संक्रांतिचक्रं ॥ ॥ शुक्रः पंच दिनान्येकं चंद्रः सुरगुरुर्दश ॥ वालवृद्ध
ः परित्याज्यास्तथा सूर्यवशास्तगाः ॥ ४७ ॥ अस्तात्पूर्वग्रहो वृद्धो वालस्तूदयतः परः ॥ पक्षं जीवः सदा त्याज्यो वार्द्धके च तथा शि
शौ ॥ ४८ ॥ प्रागुद्गतेष्टमं वालो दशाहं पश्चिमं भृगुः ॥ पक्षं वृद्धस्तु पूर्वास्ते दशाहं पश्चिमास्तगे ॥ ४९ ॥ विंध्याचलोत्तरे भागे वालवृ
द्धौ सितेज्यकौ ॥ त्रिदिनं वर्जयेद्यत्नाच्छुभकर्मणि सर्वदा ॥ गुरुभार्गवयोरस्तं दोषो जाति चतुष्टये ॥ नैव शंकरजातीनां शिशुत्वे वा
र्द्धकं तथा ॥ ५१ ॥ शुक्रे ह्रीध्रक्षहानी २५९ प्राग्दिशोस्ते ७८ वृंहयास्तथा ॥ स्थूलात्परेस्वक्वाणाश्वि २५० ग्रस्तादृश्योनवास्युः ॥ ५२ ॥
सन्मुखं वर्जयेच्छुक्रं प्रवेशे निर्गमे न वै ॥ राज्ञो विजययात्रायां नवोढायाद्विरागमे ॥ ५३ ॥ प्रतिशुक्रोपि गंतव्यं सन्मुखो यदि नेंदुज

ः॥ सन्मुखेचेंदुजेनैवपापादासयिकेष्यपि॥५४॥ एकग्रामेपुरेवापिदुर्भिक्षेराष्ट्रविग्रहे। उद्वाहेतीर्थयात्रायांप्रतिशुक्रोनवि
द्यते॥५५॥ काश्यपेषुवशिष्ठेषुभृगुष्वांगिरसेषुच॥ भारद्वाजेषुवत्सेषुप्रतिशुक्रोनविद्यते॥५६॥ पौष्णादिवह्निभाद्यंघ्रौया
वत्तिष्ठतिचंद्रमाः॥ तावच्छुक्रोभवेदंधःप्रवेशेनिर्गमेशुभं॥५७॥ अतीचारगतेजीवेस्वांराशिंनैतिचेत्पुनः॥ लुप्ताब्दःसशुभे
नेष्टोदशमासात्परायदि॥५८॥ अतीचारगतेजीवेदशमासात्परंयदि॥ दिनानिकतिचिद्भुंक्तेनतदालुप्तवत्सरः॥५९॥ गुर्वा
दित्येचलुप्तेचैवमलमासादिकेष्वपि॥ सीमंतप्राशनादीनिकार्याण्यावश्यकानिच॥६०॥ अतीचारेचवक्रेचत्वष्टाविंशतिवा
सरं॥ मृगराशिंगतेजीवेदिनषष्ठिंपरित्यजेत्॥६१॥ अमांतसमयात्पूर्वंपरतश्चाष्टनाडिका। रविमण्डलेमिसेवंकेचिद्बु
धैर्मनीषिणः॥६२॥ रविक्षेत्रगतेजीवेजीवक्षेत्रगतेरवौ॥ गुर्वादित्यंतुतत्प्रोक्तंशुभकर्मसुगर्हितं॥६३॥ रविक्षेत्रंतुपित्रर्क्षं
गुरुक्षेत्रंतुरेवती॥ मिथःक्षेत्रगतौतौहिनश्येत्तांकिलमंगलं॥६४॥ इतिशुक्रास्तादिफलं॥ अथसमाप्ताहनारवांके९०घट
त्तु६८श्रुयुतोनितं॥ भार्द्रत्रिंशोनमंशुक्राभ्युदयालोक्षमान्मुने॥६५॥ इत्युदयास्तौ॥ रंध्रेर्केक्षेत्रजोदोषोभौमजोष्टारिगे
विधौ॥ वाचपेनखेचरेदोषाःएक्षःस्तानामराःक्रमात्॥६६॥ कुजेव्ययेचशनिस्थाःस्वेप्ययेर्केस्तुपैतृकः॥ बलिदानादिकंतत्र
कार्यंदोषानुपत्तये॥६७॥ इतिदोषज्ञानं॥ संवत्पंचाग्निभू१३५हीनशालिवाहनजःशकः॥ स्यात्रेवाड्डीन्दुरामाघशाकोजात

३१७९ = १

: कलिः स्मृतः ॥ ६८ ॥ चंद्रार्केंदु १९१ युतः शाको वाणाणाष्टा ८५ संयुतोर्द्दकः ॥ षष्ट्या ६० प्रशेषकेशेयागता स्युः प्रभवादयः ॥ ६९ ॥ प्र
भवो १ विभवः २ शुक्लः ३ प्रमोदो ४ थ प्रजापतिः ५ ॥ अंगिराः ६ श्रीमुखो ७ भावो ८ युवा ९ धाता १० तथैव च ॥ ७० ॥ ईश्वरो ११ बहुधान्य
श्च १२ प्रमाथी १३ विक्रमो १४ वृषः १५ ॥ चित्रभानुः १६ सुभानुः १७ श्च तारणः १८ पार्थिवो १९ व्ययः २० ॥ ७१ ॥ सर्वजित्सर्वधारी च २२
विरोधी २३ विकृतः २४ खरः २५ ॥ नंदनो २६ विजय २७ श्चैव जयो २८ मन्मथ दुर्मुखो ३० ॥ ७२ ॥ हेमलंबो ३१ विलंब ३२ श्च विका
री ३३ सर्वरी ३४ प्लवः ३५ ॥ शुभकृच्छोभनः ३७ क्रोधी ३८ विश्वावसु ३९ पराभवो ४० ॥ ७३ ॥ प्लवंगः कीलकः सौम्यः साधार
णो विरोधकृत ४५ ॥ परिधावी ४६ प्रमाथी ४७ च आनंदो ४८ राक्षसो ४९ नलः ५० ॥ पिंगलः ५१ कालयुक्त ५२ श्च सिद्धार्थी ५३
रुद्र ५४ दुर्मती ५५ ॥ दुंदुभी ५६ रुधिरोद्गारी ५७ रक्ताक्षी ५८ क्रोधने ५९ क्षयः ६० ॥ चांद्रो दर्शावधिर्मासः सावनः खत्रिं ३० वासरैः
॥ सौरमासोर्कभोगेन नाक्षत्रो विधुभक्रमात् ॥ ७६ ॥ विवाहादौ स्मृतः सौरो यज्ञादौ सावनस्तथा ॥ वार्षिके पितृकार्ये च मासश्चांद्रो
विधीयते ॥ ७७ ॥ चैत्रान्मधुर्माधवशुक्रसंज्ञौ शुचिर्न्नभः स्यान्नभस्यकेषौ ॥ ऊर्जः सहश्चैव सहस्यनामा तपस्तपस्याविति तेक
मेण ॥ ७८ ॥ शाक इति शाके वर्षमासादिविचारः ॥ ॥ चैत्रादिमासचापार्द्रा तुलाकर्कटकद्युपाः ॥ नृपामासौ क्रमाद्वान्यपयोद
रसमृगपाः ॥ ७९ ॥ इति वर्षेशादिविचारः ॥ ॥ सूर्येंद्वारज्ञमंदेज्यराहुशुक्राः क्रमाद्दशा ॥ क्रूरे सौम्ये च विज्ञेया रौद्रादेर्वेदभैस्त्रि

भिः॥ ८०॥ अष्टोत्तरी दशा चेंदुलग्नार्कस्पष्टशा भवेत्॥ सार्द्धे द्वि घ्नाश्च सैवेंदोसिंशाद्यार्कोद्भवाः स्मृताः॥ ८१॥ ज्ञस्पार्कत्रिंशयु
क्वांद्रीसपादासृक्कभवाशनः॥ गुरोश्चांद्रीकुजाद्रीद्याः सूर्यात्याद्विगुणास्तगोः॥ ८२॥ कवेश्चंद्रार्कयोगैश्चैवं हिनदशाद्वि
तैः॥ एकमंतर्दशाद्याश्च साध्यास्तस्वदशोपरि॥ ८३॥ इत्यष्टोत्तरीदशा अंतर्दशादिनदशाक्रमः॥ ॥जन्माधिपतिलग्नेश
चेद्भार्गवमंत्रिणः। विरश्मितविंजउर्मासो जन्मभं जन्मवासरः॥ ८४॥ मृतजातकयोश्चैव सूतकग्रहणस्य च॥ तिथिवार
र्क्षजा दोषाः। करणानि स्थिराणि च॥ ८५॥ स्वरोत्पत्तिरजो मातृपित्रोः क्षयदिनं तथा॥ भानोः संक्रांतियोगैकुलिकश्चा
र्द्धयामकः॥ ८६॥ क्रूरैर्युक्तं सुतंभोग्यं मराद्गृशिखिसूमितं॥ धिष्ण्यं ग्रहहतं पापैर्विद्धसौम्यस्य पादतः॥ ८७॥ विष्टिः क्रू
रयुतं लग्नं लग्नेशो रिंध्रगः॥ जन्मभाद्दुस्थितश्चंद्रो लग्नस्थाविधनारिगः॥ ८८॥ जन्मभाज्जन्मलग्नाद्वा दुष्टयोगाग्रहोद्र
वाः॥ तिथिवृद्धिक्षयौ भानां नाडिका विषसंज्ञिका॥ ८९॥ एते दोषाः समाख्याताः शुभकर्मणि गर्हिताः॥ दशारिष्टोद्भवाश्च
न्ये गोचरोत्थास्तथागमे॥ ९०॥ इति त्याज्यप्रकरणं॥ त्रिपुष्करशतद्रोश्च विपाशैरावतीतटे॥ विवाहे शुभे नेष्टं होलिकाप्राग्दि
नाष्टकं॥ ९१॥ इति होलिकाष्टकं॥ शय्यावितरणंप्रेतदाहः काष्ठतृणार्जनं॥ ग्रामयात्रालयाच्छादो वस्वर्द्धात्पंचके न स
तो॥ ९२॥ गुरुभौमार्किवारश्चेद्भद्रासु विषमाङ्घ्रिकं॥ तदा त्रिपुष्करो योगो द्विपादे यमलः स्मृतः॥ ९३॥ पंचके पंचगुणितं

ग्र ५

7

ग्रामः
७

त्रिगुणं च त्रिपुष्करे॥ यमले द्विगुणं सर्वं हानिवृद्ध्यादिकं भवेत्॥ १४॥ इति पंचकादियोगत्रयं॥ ॥ इति श्रीमद्दैवज्ञगणायात्म
जनंदिकेश्वरविरचिते गणकमण्डने योगसंज्ञादि द्वितीयोध्यायः॥ ॥ पूर्वाश्लेषा च मूलाग्निमघाद्रीशांतकानि च॥ अ
धोमुखानि भान्येषु खनतोद्धरणानि च॥ १॥ हस्तत्रयं मृगांत्याश्विमित्रादित्येंद्रभानि च॥ तिर्यङ्मुखानि तेषु स्यात्प
शूनां दमनादिकं॥ २॥ रोहिण्यार्द्रोत्तरापुष्यं श्रुतिवस्वंबुपानि च॥ उर्द्धास्यानि च भान्येषु सर्वमुच्छ्रादिकं भवेत्॥ ३
॥ उत्तरात्रयरोहिण्यो ध्रुवं स्थिरमुदाहृतं॥ मृगांत्यचित्रामित्रर्क्षं मृदु मैत्रं मृगुस्तथा॥ ४॥ लघुक्षिप्रं स्मृतं पुष्यो
हस्ताश्वीज्याभिजित्तथा॥ तीक्ष्णं दारुणमश्लेषा ज्येष्ठार्द्रा मूलसंज्ञकं॥ ५॥ भरणी च मघापूर्वा क्रूरं चैवोग्रपंचकं॥ चलं च
रं स्मृतं स्वाती पुनर्वसुश्रुतित्रयं॥ ६॥ मिश्रं साधारणं प्रोक्तं विशाखा कृत्तिका तथा॥ नक्षेत्रेष्वेषु कर्माणि नामतुल्यानि का
रयेत्॥ ७॥ इति नक्षत्रसंज्ञा॥ मृदुध्रुवचराक्षिप्रैर्व्यदितैः प्रथमार्त्तवं॥ शुभं समूलमद्रीशैः शेषे निंद्यं सुखापहं॥ ८॥ इति प्र
थमार्त्तवं॥ ध्रुवाराधाश्विनीज्येष्ठावसुस्वातिमृगे करे॥ सद्भार्याप्ये चतुर्थेह्नि स्नाता स्त्रीधर्ममाचरेत्॥ ९॥ इति ऋतुस्ना
नं॥ तीक्ष्णोग्रांत्यं तिमंद्रीशांत्यत्का सौम्ये ह्नि सत्तिथौ॥ सप्तरात्रे व्रजेद्भार्यां पुत्रभावे बलान्विते॥ १०॥ इति गर्भाधानं॥ द्विती
ये वा तृतीये वा मासे पुंसवने क्रिया॥ अर्केज्यारे ह्निमूलार्कश्रुतिसौम्येदितिद्वये॥ ११॥ इति पुंसवनं॥ पुंसवनोक्तभैर्वारैः प

छे मासेष्टमेथवा॥ सीमांताख्यं शुभकर्म रिक्तार्काष्टविहत्यजेत्॥ १२॥ इति सीमंतः॥ भँगर्भपुष्टैः हरेः पूजां कुर्याद्धस्ये च विस्नुभे॥
मध्याह्नात्प्राक् सितेपक्षे द्वादश्यां वा नगे तिथौ॥ १३॥ इति सीमंतोत्तरं विस्नुपूजा॥ ॥स्वात्यंत्र्युपादितिक्षिप्रैः श्रुतियुग्म
मृदुध्रुवैः॥ शुभेह्नि सूतिकागारावेशनं सूतिसंभवे॥ १४॥ इति सूतिकागारावेशः॥ ॥प्रथमे द्वादशे घस्रे जातकर्म शुभेह
नि॥ स्तन्यकांते च नामाख्यं मित्रैः क्षिप्रैर्मृदुध्रुवैः॥ इति जातकर्मनामकरणे॥ ॥मृदुक्षिप्रध्रुवैर्मातुः स्तनपानं हितं शिशोः॥ रि
क्ताभौमं परित्यज्य विष्टिं पातं च वैधृतिं॥ १६॥ इति स्तनपानं॥ मासांते त्र्येनपेत्रर्क्षे मृदुक्षिप्रचरध्रुवैः॥ मध्याह्नात्प्राक् सि
ते वारे दुग्धपानं शिशोः शुभं॥ १७॥ इति दुग्धपानं॥ भौम्येष्विन्यांबुनेष्टेंद्रध्रुवमैत्रेंदुपौष्णभे॥ सूतिकायाः शुभं स्नानं रवि
भौमेज्यवासरे॥ १८॥ इति सूतिकास्नानं॥ दंता३२र्का१२भूप१६धृ१८शा१० मिते घस्रे शुभेहनि॥ दोलारूढिः शिशूनां
स्यान्मृदुक्षिप्रध्रुवैः शुभः॥ १९॥ इति दोलारूढिः॥ दोलोक्तर्क्षैः सुखद्वायां माता वा कुलयोषितां॥ योगशायिहरिं स्मृत्वा
प्राक्शीर्षं प्रविशेत्शिशुं॥ २०॥ इति खट्वारोहणं॥ मैत्रेमूले करे सौम्ये श्रवणे वादिति द्वये॥ मासपूर्त्तौ बुधेज्येज्ञे सूतिकापूज
येज्जले॥ २१॥ इति जलपूजा॥ कटिसूत्रं मृदुक्षिप्रध्रुवैर्हि द्वैः शुभेहनि॥ षष्ठाच्च पंचमे मासि शिशोर्भूम्युपवेशनं॥ २२॥ इति
कटिसूत्रभूम्युपवेशनं॥ सौम्यार्कस्वातिमैत्रांत्यचित्रादित्ये च वृष्णभे॥ तृतीये मासि सद्वारे शिशोः पूगफलाशनं॥ २३॥ ३

| चर | स्थिर | द्विस्वभा |
|---|---|---|
| १ | २ | ३ |
| ४ | ५ | ६ |
| ७ | ८ | ९ |
| १० | ११ | १२ |

त्तिपूगफलाशनं॥ तृतीये मासि षष्ठे वा देयं तांबूलकं शिशोः॥ ध्रुवक्षिप्रमृदुकस्वातिमूलार्द्रश्रवणाद्वये॥२४॥ इति तांबू
लभक्षणं॥ निशांत्ये सुदिने तुर्ये मासि निष्क्रमणं शिशोः॥ द्वादशे वाह्नि यात्रोक्तसमये कार्दिदृष्टये॥२५॥ इति निष्क्रमणं
॥ सद्वारे सत्तिथौ षष्ठे मास्यन्नप्राशनं नृणां॥ कुर्यात्त्वित्रादितिक्षिप्रध्रुवेंद्वस्वेश्रुतिद्वये॥२६॥ इत्यन्नप्राशनं॥ ॥ वेधो कर्णौ
शुभे वारे जन्मनोर्के नृपे दिनैः॥ ओजे वेवा मृदुक्षिप्रोत्तरादिस्वेश्रुतिद्वये॥२७॥ इति कर्णवेधः॥ कन्याया घ्राणवेधः स्यात्स
द्वारे विषमाब्दके॥ आद्यमासे सिते पक्षे मैत्रक्षिप्रोत्तराघ्रैः॥२८॥ इति नासिकावेधः॥ विषमेब्दे शुभे चौलं गोदानं षोडशेत
था॥ चरक्षिप्रेंदुचित्रेंदुपौष्णे च शुभवासरे॥२९॥ इति चौलकेशांतिः॥ चौलोक्तवारभे कार्या नखदंतश्मुरक्रिया॥ त्यक्त्वारि(
क्ताद्यषष्ठीं च शनिरव्यारद्वादशीं॥४०॥ इति नखदंतश्मुरक्रिया॥ उपहारादिकं चर्मकृत्संतद्धारणं तथा॥ अर्कार्किज्ञेमघापू
र्वा मृदुमिश्रैश्च दारुणैः॥४१॥ इति चर्मकृत्यधारणं॥ देवान्नत्वायने सौम्ये पंचमेब्देक्षरग्रहः॥ ज्ञेशुक्रेज्ये निले शांत्ये मृदुक्षि
प्रे दिनाश्रुतौ॥४२॥ इत्यक्षरस्वीकारः॥ कक्षावंधः सिते पक्षे सुदिने करपंचके॥ ध्रुवर्क्षे दितियुग्मेश्विपितृपौष्णेंदुवासरे॥
३३॥ इति कक्षावंधः॥ विद्यारंभः शुभेर्केज्यशुक्रे ज्ञे मृगपंचके। हस्तत्रये च पूर्वासु मूले श्विन्यां श्रुतित्रये॥ ३४॥ इति विद्यारंभः॥
विद्यारंभोक्तवारर्क्षे लिपिकृत्यमधोसुरवेः॥ धिस्मैर्वा स्थिरलग्ने च केंद्रकोणगतैः शुभैः॥३५॥ इति लिपिकृत्यं॥ वस्त्र कार्द्रं



त्यमित्रेशोगणितैः सद्बुधेज्यके ॥ ज्योतिःशास्त्रं निमित्तं च रोहिण्यां तुपमेपि च ॥ २६ ॥ इति गणितारंभः ॥ अश्विनी रोहिणी सौम्यपुष्या-
दिसेर्कपंचके ॥ शब्दशास्त्रसमारंभः शुक्रेज्ञेज्येषु भे तिथौ ॥ ३७ ॥ इति व्याकरणारंभः ॥ क्षवर्क्षादितिपुष्यार्कहरिवासवश्विवारुणे ॥ सां-
ख्यशास्त्रादिशास्त्रस्य प्रारंभः पुरिने शुभः ॥ ३८ ॥ इति सांख्यशास्त्रारंभः ॥ श्रुतित्रये मृगपुष्ये पौष्णंयुग्मेर्कपंचके ॥ धर्मशास्त्रपु-
राणानामारंभः कथितो बुधैः ॥ २९ ॥ इति धर्मशास्त्रपुराणारंभः ॥ चरोग्रांत्याश्विमैत्रेषु दिनार्द्धांत्परातः शुभः ॥ जैनशास्त्रसमा-
रंभो रविशुक्रे हि सत्तिथौ ॥ ४० ॥ इति जैनविद्यारंभः ॥ पारसीकाक्षरारंभस्तीक्ष्णौ विश्वांत्यवारुणे ॥ क्रूरे मिश्रे स्वपापे हि लग्ने
चंद्रे स्थिराग्निते ॥ ४१ ॥ इति पारसीकाक्षरारंभः ॥ परीक्षा द्रव्यरत्नादेः शुभमर्केद्रांतुपंदितो ॥ चरद्व्यंगोदयेशत्ताभूतार्थमाज्ञयोर्वि-
ना ॥ ४२ ॥ इति परीक्षा ॥ मृदुध्रुवचराक्षिप्रे सौरे बौ वारखलग्नगे ॥ विधोर्न जीववर्गस्थे शिल्पविद्या प्रशस्यते ॥ ४३ ॥ इति शिल्प-
विद्यारंभः ॥ मृदुक्षिप्रचरेस्तीक्ष्णोर्भे पाश्विद्या शुभावहा ॥ कुजेंदुर्के हितदृष्टे गारुडकर्मभीदृग्भैः ॥ ४४ ॥ इति पैशाचि-
कागारुडविद्यारंभः ॥ विचैत्रवृत्तमासादौ विभौमासे विभूमिजे ॥ छुरिकाबंधनं शस्तं नृपाणां वाश्विवाहतः ॥ ४५ ॥
इति छुरिकाबंधः ॥ धार्यावस्त्रं सितं शुक्रेजैज्यार्कहस्तपंचके ॥ वसुत्रयरोहिण्यामश्विपौष्णादितिद्वये ॥ ४६ ॥ इ-
ति श्वेतवस्त्रधारणं ॥ ध्रुवक्षिप्रांत्यवस्वीज्यचित्रामैत्रहिदैवते ॥ पीतकपूर्ववस्त्राणां धृतिर्जैज्यार्कवासरे ॥ ४७ ॥ इ

९

रामः
१

तिपीतकर्पूरवस्त्रधारणं ॥ शंखदंतभवालादिधारणं रक्तवाससां ॥ शुक्रेज्याकारवारेषु ध्रुवाख्येष्वर्कपंचके ॥ इति शंखदं
तप्रवालादिधारणं ॥ पूर्वोत्तरात्रये श्विन्यां वासवे र्कचतुष्टये ॥ अदितौ चार्किसूर्येह्नि कुजस्य नीलांबरे शुभे ॥ ४९ ॥ इति नी
लवस्त्रधारणं ॥ पट्टकूलस्थतिश्वेतवस्त्रभैः सेंदुवैस्नवैः ॥ शन्यारवर्जितवारे स्थिरलग्ने शुभान्विते ॥ ५० ॥ इति पट्टकू
लधारणं ॥ वस्त्रं सुकृमिजं धार्यं क्रूरक्षिप्रचरध्रुवैः ॥ सूर्येन्दुगुरुवारेषु स्थिरलग्नोदये शुभं ॥ ५१ ॥ इति कृमिजवस्त्रधा
रणं ॥ ऊर्णावेमादिकं नव्यं ग्राह्यं धार्यं मृदुध्रुवैः ॥ सर्वं कुर्विंदुहस्ते तु कर्तव्यं हि शनिं विना ॥ ५२ ॥ इति वस्त्रोसादनं ॥ ह
स्तनीलांबरोक्तर्क्षैः पुष्यपौष्णान्वितैः शुभाः ॥ अर्कार्कीभृगुवारेषु लोमपट्टधृतिः सदा ॥ ५३ ॥ इति लोमजवस्त्रधारणं
॥ आदित्ये वासवे चित्रामृगमैत्राश्विनी ध्रुवा ॥ सूचीकर्म तनुत्राणां सहारे सत्तिथौ तनौ ॥ ५४ ॥ इति वस्त्रसीवनारंभः ॥ प
रिधेयकंचीज्ये पत्रे देहदुर्गां चरोदये ॥ मित्राश्विपुष्यवस्वेष्वपि चित्रा स्वाति लघुस्थिरैः ॥ ५५ ॥ इति देहदुर्गपरिधानं ॥ च
रध्रुवमृदुक्षिप्रैर्वास्तुयोगैः शुभावहैः ॥ कुर्याद्वस्त्रालयं तत्र प्रवेशं तत्प्रवेशभैः ॥ ५६ ॥ कार्यं सौम्ये हि तत्तूली स्यैवितानाघूर्द्ध
वेधनं ॥ ५६ ॥ इति तल्लिकापधानादि ॥ मृदुमूलध्रुवैर्द्राणि द्वीशे सत्त्वयशा ह्युजं ॥ कर्मस्त्वप्त्वौ बराशिं च शुभा रिक्तासरि
क्तिका ॥ ५७ ॥ इति सूपशास्त्रोक्तकर्म ॥ भोज्यपात्रं सुधासिद्धौ घटयेद्दासमाचरेत् ॥ तत्रान्नप्राशनः प्रोक्तकाले भोजन

माचरेत्॥५९॥इति भोजनपात्रघटनादिकर्म॥ ॥त्रिपुष्करे ध्रुवप्रचरैर्भूषणघटनं॥रक्तयुग्मृदुमिश्राद्यैस्तैश्च भौमार्कि
वासरे॥६०॥इति भूषाघटनं॥हेमरत्नाद्यलंकारधारणं शंखदंतभैः।वारैश्च स्थिरलग्नेच स्वायभावे शुभैर्युते॥६१॥इति
हेमरत्नाद्यधारणं॥हरिपुष्यधनिष्ठाद्रांत्यपौष्णाश्ववासवौ ध्रुवैः॥किरीटधारणं श्रेष्ठं धशन्यारवर्जितैः॥६२॥इति मुकु
टधारणं॥धार्यं शुक्रेज्यचंद्रार्के खड्गकूर्माजिनं चयत॥मृदुस्वातिमघाउज्येष्ठाद्रास्वर्के श्रुतित्रये॥६३॥इति खड्गकू
र्मास्थिजधारणं॥घटनं राजतं सर्वमुक्तादग्रान्वितं तथा॥धार्यं चसोमशुक्रेह्नि चरक्षिप्रमृदुध्रुवैः॥६४॥इति राजतमु
क्ताहीरकादिधारणं॥लब्धं राजप्रसादेन विप्रादेशात्त करग्रहे॥प्रीत्याप्तं चोत्सवे धार्यं वस्त्राद्यं निंद्यभादिके॥६५॥
इति निषिद्धदिनेपि वस्त्रादिधारणं॥वस्त्रहेमाद्यलंकारधारणोक्तैः स्वभादिकैः॥शनिज्ञवर्जितैर्वारैस्तेषां क्षालनसं
ग्रहौ॥६६॥चंदनागुरुकस्तूरीघनसारादिकाः क्रियाः।कार्यास्तेयश्रुतिक्षिप्रचरैर्मित्रैः शुभे हनि॥६७॥इति चंदनादि
क्रिया॥पुष्पकृत्यं मृदुस्वातिपुष्येषु श्रवणाश्रये॥न लग्ने चंद्रदृष्टे च नराणां शुक्रेंदुवासरे॥६८॥इति पुष्पकृत्यं॥का
चकज्जलयोः कृत्यं शुक्रार्कार्कि दिने शुभं॥त्वाष्ट्रहस्तैंदवपौष्णाश्विवसुमित्रहरिदैवभे॥६९॥इति काचककज्जलकृत्यं॥
अग्न्याधानं ध्रुवैर्मार्श्विद्वीशपुष्यैंदुशक्रभे॥कर्किनक्रेत्रयंपत्कोडुलग्नेषु दिने शुभं॥७०॥इत्यग्न्याधानं॥पदाभिषे

10

करेज्यैश्रुतिक्षिप्रमृदुध्रुवैः॥ तुलालिसौम्यगोर्केस्मात्त्रार्किभौमचरोदये॥७१॥ इतिपट्टाभिषेकः॥ मृतेभूपेसुताभा
वेराज्यदानं कुलोद्भवे॥ नृपाभिषेकंतत्कालंनोक्तवारादिचिंतयेत्॥७२॥ इतिपुत्राभावेराज्याभिषेकः॥ शकमित्रो
दयाभूयः स्वासनस्थोभिषेकजैः॥ जनैर्नमस्कृतोजातोनमंत्राद्यभिषेचनं॥७३॥ इतियवनमिह्लादावभिषेकाभावः॥ श्रु
तियुग्ममृदुक्षिप्रैराज्ञांमुद्राशुभप्रदा॥ गुरुशुक्रोदयेसत्कानंदाचंद्रार्किरिक्तकाः॥७४॥ इतिराजमुद्रा॥ दीपकाचामरछ
त्रेदोलाशय्यासनादिकं॥ राज्योपकारकंसर्वंकुर्यात्पट्टाभिषेकभैः॥७५॥ इतिराज्योपकरणं॥ पत्तनेचपुरेदेशेविजले
मौलवंधनं॥ नृपाभिषेकवारक्षैर्वाद्यगीतादिपूर्वकं॥७६॥ इतिमालवंधनं॥ क्रूरार्यम्णहस्तशस्त्राणांपट्टबंधारणांस्मृतं॥
मिश्रोग्याश्विमृगेत्तीक्ष्णैः क्रूरलग्नेविशेषतः॥७७॥ इति अम्मस्त्रशस्त्रधारणाघट्टनं॥ —॥मिश्रोग्रदारुणांस्मार्कवा
युदित्यनिलेश्रुतौ॥ क्रूरेह्निनलिकास्त्राणांकृत्यंरिक्तानयामुसत्॥७८॥ इतिनलिकाशस्त्रकृत्यं॥ हस्तत्रयेश्रुतौदस्रेपुष्या
दित्योत्तरासु च॥ सुदिनेसर्वशास्त्राणामभ्यासः सकृवंविना॥७९॥ इतिशस्त्राभ्यासः॥ नृत्यारंभः शुभेवारेपुष्यहस्तोत्तरेंदु
भैः॥ मित्रवसुवुपांत्यपवस्रेज्ययुक्तेस्थिरोदये॥८०॥ इतिनृत्यारंभः॥ करवाद्यंमृदुक्षिप्रचरैः पूर्णाजयार्कजैः॥ सुखवाद्यंतुपापा
देरिक्तातीक्ष्णोग्रभैः शुभं॥८१॥ इतिवाद्यकृत्यं॥ जायाजीविनरादीनांकृत्यंमूलचरस्थिरैः॥ चित्राद्याधेनुतिष्येशैः शुभंत्यक्त्वा

किंवित्त कुन्तान्॥८२॥ इति नायाजीविक्रमनटक्रिया॥ पौष्णाश्वींदुकरेस्वातौ वसुयुग्मे दितिद्वये॥ सुलग्नेश्वक्रिया शस्ता
रिक्तामंदारवर्जिते॥८३॥ इति अश्वकर्म॥ मृदुक्षिप्रचरैः कार्या त्वरिक्ता शुगजक्रिया॥ रव्यार्किगुरुवारे शुस्थिरलग्ने विशेष
तः॥८४॥ इति गजकर्म॥ रथकर्म शुभेक्षिप्रमृदुबाह्लेंदुभैः स्वरैः॥ सौम्योदये शुभे वारे रविवारे विशेषतः॥८५॥ इति रथ
कर्म॥ शिविकायाः शुभे वारे घटनारोहणे स्मृतं॥ उत्तरेंदुमृदुक्षिप्रचरभैश्च शुभोदये॥८५॥ इति शिविकाकृत्यं॥ महि
ष्यजादिकं कर्म वैरवो पुष्युनां च सत्॥ वासवद्वयतो येंद्र तिष्यं ग्राम्यकृत्यं विना॥८६॥ इति महिष्यादिकृत्यं॥ विप्रोक्तसम
ये शिल्पं चौलोक्ते स्वुरकर्मवं॥ अश्वादीनां तथा आनप्राशनाद्युनिजोक्तभे॥८७॥ इति अश्वादीनां शिक्षादि॥ गजाश्वोष्ट्र
खरादीनां क्रसंपल्याणजं शुभं॥ श्रुतिहस्तमृगाश्वीन्यमूलादित्ये च दारुणे॥८८॥ इति नूतनपल्याणकृत्यं॥ ज्येष्ठाहस्तावि
शाखा सुपौष्णयुग्मादितिद्वये॥ धनेष्ठाद्वितयं वायौ पशूनां क्रयविक्रयौ॥८९॥ इति पशूनां क्रयविक्रयौ॥ प्रवेशं च ग
मस्थानं पशूनां नो कुजो हि सत्॥ दर्शाष्टमीचतुर्दश्यां कुवेला पुंभ्युतां तथा॥९०॥ इति पशुकृत्यनिषिद्धं॥ सौम्यवारे मृगा
दीनां च गिरिणां वनचारिणां॥ चरक्षिप्रध्रुवे द्वक्षे कर्म कार्यं शुभोदये॥९१॥ इति मृगादिवनचारिणां कृत्यं॥ ज्येष्ठा ऽरो
हिणी राधा लघुभैः क्रूरवासरे॥ गरौ च व्याघ्रकादीनां नखिनां कर्म सिद्धिदं॥९२॥ इति व्याघ्रादिकृत्यं॥ क्षुराकर्म च

11

रामः
११

रैक्षिप्रैः कार्यं भौमादिकं विना ॥ न कुर्यात्तु पंचके तद्वद्यमले च त्रिपुष्करे ॥ ८३ ॥ इति ऋणकर्म ॥ तिर्यङ्मुखैस्तथा चोर्द्ध्ववक्त्रै
ःसौम्यार्कवासरे ॥ शुककुक्कुटकादीनां पक्षिणां कर्मसिद्धिदं ॥ ८४ ॥ इति पक्षिकसं ॥ चरैःक्षिप्रैः स्थिरैर्लग्ने शुद्धे धर्मसुता
ष्टमे ॥ व्यवहारादिना द्रव्यप्रयोगः स्याद्बुधं विना ॥ ८५ ॥ इति द्रव्यव्यवहारः ॥ नंदापूर्णासिते ज्येषु धरिण्याः क्रयविक्रयौ ॥ मूले
न्द्रे हि मघापूर्वादितिद्वीशांत्यमित्रभे ॥ ८६ ॥ इति भूमेः क्रयविक्रयौ ॥ मृदुपुष्याश्विनीवैष्णादितिद्वीशं श्रुतित्रये ॥ निधी
नां संग्रहे वृद्धौ कुर्यात्स्थापनमध्यमे ॥ ८७ ॥ इति निधिस्थापनसंग्रहे ॥ अंधं मध्येक्षणां मध्यलोचनं दिव्यलोचनं ॥ ग
णयेद्रोहिणीभात्तु यावन्नक्षत्रदिनस्थभं ॥ ८८ ॥ अंधे चलं भवेत् शीघ्रं मंदे यत्नाच्च यज्ञतं ॥ स्याद्दूरे श्रवणं मध्ये श्रुतं प्राप्तिर्न सु
लोचने ॥ ८९ ॥ तद्यात्सधे दिशं पूर्वां मंदे तु दक्षिणां तथा ॥ मध्ये च पश्चिमामिस्लां दिव्यनेत्रे हि होत्तरां ॥ ९० ॥ इति नष्टप्रा
प्तिः ॥ पौष्णांबुपाश्विनीवातश्रुतिचित्राः क्रये शुभाः ॥ पूर्वाग्न्यहियमद्वीशनिश्चये च घटं विना ॥ १ ॥ इति समस्तवस्तु
क्रयविक्रयौ ॥ विपणिः स्याद्ध्रुवाक्षिप्रमित्रभैः शुभे तिथौ ॥ ज्ञायखैः सद्ग्रहैः श्रेष्ठा रिक्ता भौमघटैर्विना ॥ २ ॥ इति वि
पणिः ॥ लघुश्रुतित्रयेज्येष्ठाविश्वांसिहृदितीशभैः ॥ सोत्तरैः शुक्रजीवेंदुसूर्यैर्विनिमयः शुभः ॥ ३ ॥ इति विनिमयः ॥ मृदु
क्षिप्रध्रुवादितिस्माहतेवश्रुतित्रये ॥ सद्वारे स्थिरलग्ने च प्रतिमाघटनं शुभं ॥ ४ ॥ इति प्रतिमाघटनं ॥ प्रतिष्ठानादिकन्तां

क्षिप्रध्रुवैर्मैत्रे श्रुतिद्वये॥ मित्रादित्येत्वरिक्तारे स्वदेवर्क्षे तिथौ शुभा॥ ५॥ इति देवप्रतिष्ठा॥ सर्वतोयाश्रयारंभः सद्वारे
जलेभोदये॥ ध्रुवैर्वसुद्वये हस्तपुष्यमैत्रे मघासु च॥ ६॥ इति जलाशयारंभः॥ ध्रुवर्क्षे स्वातिभे सौम्येहृपलग्ने शुभेक्षिते॥
सेतूनां बंधनं कार्यं जीवमंदार्कवासरे॥ ७॥ इति सेतुबंधः॥ भाग्यवासवमैत्रेंद्रलघुमूलेदितौ श्रुतौ॥ सद्वारेर्केदिने नौकाघ
टनं तालनं स्मृतं॥ ८॥ इति नौकापूरणं॥ सौम्यवारे तुरीसंभघटने धनमिष्टदं॥ श्रुतित्रये ध्रुवे शाक्रे रिक्तामावर्जिते दिने॥
॥ ९॥ इति पट्टबंधः॥ प्रपांबुदानसौम्याग्निपूर्वाषाढे जलोदये॥ वारिबंधनमोक्षौ च तोयारंभोक्तवारभैः॥ १०॥ इति प्रपांबु
दानवारिमोक्षणं॥ जलोदयेंबुयंत्रस्य [illegible] आरार्किवासरे॥ मघामूलानुपैत्र्यसार्पपूर्वासु वै शुभं॥ ११॥ इति जलयंत्र
क्रिया॥ लतौषध्यादिवृक्षाणां रोपणं महिले शुभं मृदुक्षिप्रध्रुवैर्मूलानुराधाशैः शुभोदये॥ १२॥ इति लतारोपणं॥
जलाशयमठारामप्रतिष्ठा मृदुभिर्ध्रुवैः॥ श्रुतिजयादितिक्षिप्रैः सद्वारेर्केऽयने शुभं॥ १३॥ इति मठजलारामप्रतिष्ठा॥ कृ
षिभूमौ च सद्वारेऽवकरक्षेपणं शुभं॥ मूलपुष्याजपादाश्विचरभेषु शुभोदये॥ १४॥ इति कृषिभूम्यावकरक्षेपः॥ मृदुध्रुव
चरक्षिप्रमघामूलविशाखभैः॥ हलप्रवहणं श्रेष्ठं त्यक्त्वा रिक्तार्किविकुजान्॥ १५॥ इति हलप्रवहणं॥ मृदुध्रुवलघु
स्वातिपित्र्यवासवमूलभैः॥ विनारिक्तार्किभौमैश्च शुभे बीजोप्तिरोपणे॥ १६॥ इति बीजोप्तिरोपणं॥ कूपांबुसिद्धिसम्या

12

रामः
१२

नां वापनं शुभदं स्मृतं ॥ बीजोप्तिवारभैस्त्यक्त्वा पितृहस्तश्रवासरान् ॥ १७ ॥ इति कूपं वुपानदानं ॥ तीक्ष्णोग्रराजपादार्के वाघिं द्वासि
जलांतिके ॥ पुष्येविसुहृद्येद्वेघ्रं धान्यंच्छारार्किरिक्तके ॥ १८ ॥ इति धान्यकर्त्तनं ॥ भाग्यार्यमश्रुतिस्वेष्ठापितृधात्र्यंत्यमित्रभे ॥
मूलेवार्किकुजौ त्यक्त्वा कणामर्द्दणमाचरेत् ॥ १९ ॥ इति कणमर्द्दनं ॥ वीज्ञोप्तिवारनक्षत्रैर्गृहे त्वानयनं कृषेः ॥ नभपुष्यफलादी
निप्रोक्ता यो हरणं तथा ॥ २० ॥ इति नूतनान्नानयनफलपुष्पोत्तारणं ॥ अशनं चनवान्नानां मृदुक्षिप्रचरैः शुभे ॥ विनाविषघ
टीनंदामधुपौषार्किभूमिजान् ॥ २१ ॥ इति नूतनान्नाशनं ॥ हस्तेमृदुध्रुवे श्विन्यां श्रुतियुग्मेशुभेहनि ॥ अर्कं चनवमूलानां वु
फलानामशनं स्मृतं ॥ २२ ॥ इति नूतनफलमूलाद्यशनं ॥ हस्तचित्रादितिस्वातिरेवतीपुष्यश्रुतिद्वये ॥ वीजं धार्यं स्थिरेलग्ने वारे

१५

शुक्रज्ञजीवके ॥ २३ ॥ इति वीजसंग्रहः ॥ ॥ कोष्ठकादौ शुभा धान्यस्थितिस्थिरा स्थिरोदये ॥ ज्ञार्किवर्जितवारेषु मृदुक्षिप्रचरैः
शुभैः ॥ इति कोष्ठकादौ धान्यनिःक्षेपः ॥ भाद्रापाढद्वये मूले [illegible]स्वात्यंत्यार्केन्दुवासरे ॥ वेधनं सर्ववीजानां शस्तं स्वायोदि
के सदा ॥ २५ ॥ इति धान्यवेधनं ॥ वस्वंबुपश्चैशभाः शुभाह्वे धान्यनिष्क्रयः ॥ धान्यवृद्धि ज्ञवेज्यंदुह्निदैवाश्विचरोडुषु ॥ २६ ॥
इति धान्यनिष्क्रयवृद्धिः ॥ तोयारं भोक्तवारक्षैः शुद्धि नेत्रसंग्रहः ॥ जयापादास्यादि भूमानां स्थिरभे स्थास्थिरोदये ॥ २७ ॥ इति
मदासादिसंग्रहः ॥ श्रुतित्राष्ट्यांतकर्क्षेषु शनिवारे विशेषतः ॥ लवणागारं भक्तसंचकुर्याच्छ निवलेदिवा ॥ २८ ॥ इति लावण

र्भकृत्यं ॥ तीक्ष्णोग्रवारुणैः कार्यो मद्यारंभस्तु सद्दिने ॥ भक्ष्यं हि मार्दं चान्यन्नधुप्पानं शनेर्दिने ॥ २९ ॥ इति मद्यारंभपानादि
मादकभक्षणं ॥ चौर्यं मंदारयोर्वारे क्षिप्रे मिश्रोग्रदारुणैः ॥ शकुनस्य बले कुर्यात्स्वष्टे दशमगे कुजे ॥ ३० ॥ इति चौरकृत्यं
॥ भौममंददिने लग्ने क्रूरे क्रूरस्य होरये ॥ रिपूणां वंधनाद्यं च क्रूरैर्दारुणभैः शुभं ॥ ३१ ॥ इति रिपुवंधः ॥ जयापूर्णासु सद्वा
रे क्रूरगेये मसत्कोटये ॥ शुभैः केंद्रगतैः सार्कैः शुद्धेदौम्या हलक्रिया ॥ ३२ ॥ इति मल्लादिसर्ववलक्रिया ॥ प्रेतक्रियानक
र्त्रेष्वाधनिष्ठादिपदे परे ॥ पूभोभावान्गौपोस्मेदाह स्याद्गुहिकान्तरे ॥ ३३ ॥ इति प्रेतक्रियानिषिद्धा ॥ तैतिले करणे भा
ग्ये मैत्रे पुष्ये चमी दिने ॥ द्वादश्यां शुक्लमंदे वै लग्ने संधिर्विधीयते ॥ ३४ ॥ इति संधिः ॥ मृत्सुदः स्वातिपुष्यार्द्राज्येष्ठाश्लेषोडु
रोगदः ॥ रिक्ता षडर्क पापाहे चान्यथा चेन्निरोगदा ॥ ३५ ॥ इति रोगाद्येशुभाशुभं ॥ भैषज्योत्सादनं मूलमृदुक्षिप्रचरे स्वभे
सेवनं च शुभे लग्ने मदारं रहिते दिने ॥ ३६ ॥ इति औषधोत्सादनं सेवनं ॥ मूलाश्विद्धकरेशर्क्षवसुमित्रे सत्क्रिया ॥ कार्यासे
वामृदुक्षिप्रचरैस्त्रीज्यार्कभूमिजे ॥ ३७ ॥ इति रसोन्मादनमक्षणं ॥ पंचकं मंविनाशार्किभैषजर्क्षोक्तरेंदुभैः ॥ वमनं रेचनं
पक्षिरुद्राधः पार्श्वभे रुतः ॥ ३८ ॥ इति वमनरेचनादिपंचकर्म ॥ तैलाभिमज्जनं शस्तं मृदुक्षिप्रचराध्रुवैः ॥ सपूर्वेन्दुज्ञमंदे
ज्ये त्रिपंचाग्नितिथौ तथा ॥ ३९ ॥ इति तैलाभिमज्जनं ॥ मृदुक्षिप्राश्रुपस्ताश्रिभुतीन्द्वैः क्रूरभोदये ॥ शिरामोक्षादिकाः कार्याः

13

शर्मः
१३

क्रियाचार्केऽस्य भूमिजे ॥५०॥ इति रक्तस्रावक्रिया ॥ अग्निशस्त्रक्रिया कार्या रेवाह्णोत्वाष्ट्रदास्रभैः ॥ मिश्रेश्च दारुणेश्चैव
क्रूरलग्ने विशेषतः ॥५१॥ इति व्रणशस्त्राग्निक्रिया ॥ न स्नानं रोगमुक्तस्य कार्यं शुक्रेंदुवासरे ॥ व्रणमुक्तो नरः स्नायात्कु
वारर्क्षतिथिष्वपि ॥५२॥ इति व्रणशस्त्राग्निक्रियामुक्तस्नानं ॥ न स्नानं रोगमुक्तस्य कार्यं शुक्रेंदुवासरे ॥ पौष्णब्रह्मा
दितिस्वातिमघाश्लेषोत्तराख्ये च ॥५३॥ इति रोगमुक्तस्नाननिषिद्धं ॥ रिक्तातिथौ चरे लग्ने हीने चंद्रबले शुभं ॥ स्नाने हि
गदमुक्तस्य त्याज्यवारर्क्षवर्जिते ॥५४॥ इति रोगमुक्तस्नाने शुभं ॥ सद्वारे रोगमुक्तस्य गृहान्निष्क्रमणं बहिः ॥ हस्तेंदु
श्रुतिमूलाश्विवस्वादित्येज्यभेषु ॥५५॥ इति रोगमुक्तस्नानोत्तरं बहिर्गमः ॥ यमाग्निमूलसार्पार्द्रामघाद्रीशेषु नश्य
ति ॥ सर्पदंष्टो हीनबले चंद्रे याम्यायनेन नरः ॥५६॥ इति सर्पदंष्टः ॥ व्यालाद्याहरणं कार्यं तीक्ष्णोग्रैः क्रूरवासरे ॥
हित्वा कालादिकं राहोः केंद्रगे वा शनौ कुजे ॥५७॥ इति व्यालग्रहणं ॥ मौंजीबंधोक्तवत्सर्वं दीक्षाकाले व्यचिंतयेत्
॥ स्थिरर्क्षे चैव मौंजीभे दीक्षा कार्या शुभोदये ॥५८॥ इति दीक्षाविधिः ॥ मंत्रयंत्रव्रतादीनि होमासोद्यापनानि च ॥
कार्यं माश्विमखिंदुद्वीशेसौम्यार्कवासरे ॥५९॥ इति मंत्रयंत्रव्रतादि ॥ चार्वाकजैनयवनाद्यधर्मशास्त्रं चरोदये ॥ जया
पूर्णेंदुशुक्रेज्यविश्वाश्वींदुचैः शुभं ॥६०॥ इति चार्वाकादिक्रिया ॥ मृदुध्रुवचराक्षिप्रैः कार्यं शांतिकपौष्टिकं ॥ शु

द्रे धर्मोदये धर्मकृत्संन्यासार्किवर्जिते ॥५१॥ इति शांतिकपौष्टिकं ॥ कर्मोत्सूर्यजशुक्रार्किचंद्रारेज्याग्नकेतवः ॥ सूर्यभात्त्रित्रिभैश्चंद्रे नेष्टा होमाहुतिः खले ॥५२॥ इति वह्निनक्षत्रं ॥ सैकातिथिर्वारयुता कृताप्ता शेषे गुणेभ्रे भुवि वह्निवासः ॥ सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च ॥५३॥ इति वह्निवासः ॥ पित्र्येंदुयाम्यमूलेशसिद्धिवीराग्निवारयोः ॥ कुहूष्टमे च पताले भृगौ ज्ञे घटलग्नगे ॥५४॥ इति वैतालसिद्धिः ॥ स्थिरश्रुतित्रयपुष्यत्वाष्ट्रार्द्रासु शुभेहनि ॥ अर्के च पुमदं ज्ञेये कृत्यं शैलूषिणामिह ॥५५॥ इति शैलूषिकृत्यं ॥ नराश्वहस्तिपभादीनां लिंगस्य छेदनं स्मृतं ॥ अर्काराग्नेसपुष्यार्कस्वातीदुश्रुतिवासवे ॥५६॥ इति लिंगोच्छेदनं ॥ कृष्णपक्षे सदोषर्क्षैर्मिश्रैरुग्रैश्च दारुणैः ॥ दिव्यं कार्यं कुजे मंदे स्थिरलग्ने खलोदये ॥५७॥ इति दिव्यं ॥ कृत्यं तैलकयंत्रस्य रिक्तामावर्जिते तिथौ ॥ लघुमित्रेंद्रवस्वादितित्वाष्ट्रे शुभेहनि ॥५८॥ इति तैलयंत्रकृत्यं ॥ सर्वं कुलालकृत्यं च सौम्येर्केह्नि चरोदये ॥ मृदुवायुश्रुतिक्षिप्रधातृहस्तादितिद्वये ॥५९॥ इति कुलालकृत्यं ॥ सूत्रधारक्रियारंभः सद्वारे केकें विरिक्तिके ॥ मृदुक्षिप्रचरैर्ज्येष्ठाद्वीशधातृयुतैः शुभं ॥६०॥ इति सूत्रधारक्रियारंभः ॥ रंगाजीवक्रिया शस्ता भृग्वीज्यार्कारवासरे ॥ चित्राद्वयादितिक्षिप्रधातृविंदौ श्रुतित्रये ॥६१॥ इति रंगाजीवक्रिया ॥ रजकस्य क्रिया प्रोक्ता सद्वारे जन्मदिनं विना ॥ हस्तेज्यस्वातिराधेंदुश्रुतिवस्वदितिस्थिरैः ॥६२॥ इति रजकक्रिया ॥ रथकारक्रियारंभे मृदुक्षिप्रचरेंद्रभे

१५

ः॥सवित्रेश्वसुमंलग्नेवारेमंदेऽप्यवर्जिते॥६३॥इतिरथकारक्रियारंभः॥पापवारेस्थिरेलग्नेमणिलोहाश्मजाक्रिया॥याम्येंद्राग्नि
शिवत्वाष्ट्रधात्रमूलानिलेषु च॥६४॥इतिलोहकाराश्ममणिकारकृत्यं॥सद्वारेर्कक्रियारंभःस्यात्सूचिककुविंदयोः॥चरलग्ने
मृदुक्षिप्रैःसज्येष्ठब्राह्मभैःशुभैः॥६५॥इतिसूचिककुविंदयोःकृत्यं॥नापितस्यक्रियारंभःसद्वारेंद्रांत्यचित्रभैः॥मृगक्षिप्र
चरैश्चैवरिक्ताषष्ठ्यष्टमीविना॥६६॥इतिनापितकृत्यं॥भिल्लकैवर्त्तकव्याधकृत्यंचाविटकक्रिया॥पापेह्निभरणीपूर्वातीक्ष्णा
द्वीशांबुपानिले॥६७॥इतिभिल्लकैवर्त्तकादिकृत्यं॥सर्वमाभीरजंकृत्यंकार्यंज्ञार्केंदुवासरे॥द्वीशांत्येंद्रमृगक्षिप्रदित्येचाह्नौ
श्रुतित्रये॥६८॥इतिआभीरकृत्यं॥पुष्यःपरकृतंहंतिनतुपुष्यकृतंपरः॥दोषस्त्वनिष्टगोपीन्दौपुष्यःसर्वार्थसाधकः॥६९
॥इतिपुष्यार्कप्रशंसा॥ ॥इतिश्रीमद्देंगरायात्मजनंदिकेश्वरविरचितेगणकमंडनेनक्षत्रवारादिकृत्येतृतीयोध्यायः॥
॥ ॥आर्द्राश्लेषानुराधाचमघाचैवधनिष्ठिका॥पूर्वाषाढोत्तराषाढेत्यभिजिद्रोहिणीक्रमात्॥१॥ज्येष्ठाविशाखभंमूलं
शतर्क्षंपूर्वफाल्गुनी॥उत्तराफाल्गुनीज्ञेयादिवापंचदशक्षणाः॥२॥रात्रिक्षणास्तथार्द्राचपूर्वाषाढादितोष्टवै॥पुनर्वसुद्वयं
करणौहस्तादित्रितयंक्रमात्॥३॥यस्मिन्भेयच्चकर्मोक्तंतत्कार्यंतन्मुहूर्त्तके॥वारोक्तंतस्यहोरायांलग्नेप्रोक्तंतन्नवांशके॥४॥क्षणोष्टमो
जित्संज्ञःसएवकुतपःस्मृतः॥तस्मिन्कालेशुभाकार्याविनायाम्यंबुधैःस्मृता॥५॥इतिदिनरात्रिक्षणाः॥मूलांशादित्रयेजातापित्र

मा

मातृधनापदः॥ तुर्येशस्तं क्रमाद्यस्तंसार्पेंसाशाफलं हितत्॥ ६॥ ज्येष्ठं ज्येष्ठाद्यगो हंति द्वितीये लघुसोदरं॥ तृतीये जननीं तद्वदात्मानं च चतुर्थके॥ ७॥ मूलांत्सपादजा ज्येष्ठा तथाश्लेषांत्सपादजा॥ द्वीशांत्सपादजा कन्या दुष्टा ज्येष्ठांत्यजा तथा॥ ८॥ प्रसूताव् एकनक्षत्रे पितृपुत्रौ च सोदरौ॥ भगिन्योर्वा तयोर्मृत्युर्भवेदेकस्य निश्चयं॥ ९॥ गण्डांतमूलसार्पेन्द्राद्युत्थं दुष्टफलं हितत्॥ शिशोर्दर्शनात्त्यागो वक्ष्यांते वा तद्विलीयते॥ १०॥ इति मूलजादिजातफलं॥ पित्रे श्विपुष्यमनेत्रेषु भूचंद्राश्विषडर्क भात्॥ काश्यासवाऊहलौसे – गुह्योरुपादकं॥ ११॥ राज्यं भोज्यं बलं भ्रंशं वीर्यं सौख्यं तथैश्वरं॥ असंतुष्टामनाचाराम् अल्पायुश्च क्रमात्फलं॥ १२॥ इति सूर्यपुरुषाकारचक्रं॥ वक्त्रेकंगाद्विवामाग्निह्यक्षिणी शनिभान्न्यसेत्॥ मुखे दक्षिणदोष्ण्यंघ्रौ दोहरोकाक्षिगुह्यके॥ १३॥ मुखे हानिर्जयो बाहौ मौंघ्रौ वा मदोक्षितकौ॥ हृदि श्रीर्मस्तके राज्यं नेत्रे सौख्यं मृतिर्गुदे॥ १४॥ इति शनिपुरुषाकारचक्रं॥ अथ यात्रा प्रस्तूयते॥ पूर्वादिषु क्रमान्मेषाद्विशेयात्त्रिविधोः स्थितिः॥ सन्मुखो दक्षिणश्चंद्रः शुभोन्यत्र धनार्तिदः॥ १५॥ दत्वा त्रिवारपूर्वस्यामर्घ्यं वा राजक्रमान्न्यसेत्॥ यत्रार्किलग्नकालेस्ततोशेषाशकः शुभः॥ १६॥ प्रागुत्तराग्निनैरृत्यपापेष्वनिलशंभुषु॥ याने प्रतिपदादेश्च वामे ग्रेयोगिनीं त्यजेत्॥ मूलं ज्येष्ठं दुर्नंदाः प्राक् प्रत्यक् प्राह्स्मार्कभार्गवाः॥ उदग्यमर्क्षभौमज्ञा याम्या मजांघ्रिधीषणौ॥ १८॥ सूर्यशुक्रारराहुर्किचंद्रज्ञगुरवः क्रमात्॥ दिक्पाः पूर्वाच्छुभाः केन्द्रे नेष्टालो

15

रामः
१५

लादिकास्तुते ॥१९॥ लग्नाष्टांत्यारिगश्चंद्रे नेष्टः खेर्किः सितोस्तगः ॥ लग्नयोमृत्युदोयाने रंध्राष्टारिव्ययोपगाः ॥२०॥ जन्मराशेर्जनु
र्लग्नाद्वाष्टमे स्वारिभारिभे ॥ तनुस्थे मृत्युदं याने लग्नेगेर्वातिदीश्वरैः ॥२१॥ लग्नपोस्तंगतो वक्री केंद्रं वक्रगतोथवा ॥ वक्रवारो न
सद्याने कुंभमीनौ तु सांशकौ ॥२२॥ लग्नेशो वाथ राशीशो यात्रालग्नेश्वरस्तथा ॥ पूर्णेन्दुर्वा दिगीशो वा केन्द्रगता श्रियं लभेत् ॥
॥२३॥ गुरुशुक्रविदामेको योगाः केंद्रत्रिकोणगाः ॥ द्वाभ्यां श्रेष्ठोधियोगः स्यात्त्रिभिर्योगाधियोगकः ॥२४॥ आवश्यके मूर्त्तौसौ
म्येस्ते निधने तथा ॥ व्रजेदर्कोदयेस्ते वा मध्याह्ने वा विशंकितः ॥ उषाकालं विना पूर्वे याने याम्ये विनाभिजित् ॥२५॥ विनोत्तरां ।
निशीथं सन्नू गोधूलिः पश्चिमां विना ॥२६॥ गच्छेत्प्राच्यां गजेनैव दक्षिणां स्याद्रथेन च ॥ प्रतीच्यां तुरगेनैयात्तथोदीच्यां नरैर्नृपः
॥२७॥ प्रवेशान्निर्गमो न स्यान्निर्गमान्न प्रवेशनं ॥ नवमे भे तिथौ वारे मासे द्वेकथितं बुधैः ॥२८॥ उत्सवोपनयोद्वाहप्रतिष्ठासूत
कादिके ॥ आर्त्तावप्यसमाप्ते तु यात्रां कुर्यान्न मानवः ॥२९॥ क्रोधं क्षौरं रतिं वांतं तैलाभ्यंगाश्रुलोचनं ॥ घृतं मांसं गुडं तैलं मद्यपानं प
रित्यजेत् ॥३०॥ यात्राप्रवेशको स्यातां यदेकाहे पुरात्पुरे ॥ योगिनीवारशूलादीश्चिंतयेन्नैव बुद्धिमान् ॥३१॥ स्वयं त्वगमने
स्थाप्यं प्रस्थानं हरतो गृहात् ॥ वारशूलादिकं हित्वा गंतव्यं स्थानसन्मुखं ॥३२॥ प्रस्थानेपि कृते नेयान्महादोषान्विते दिने ॥
जन्मर्क्षे चाष्टमे चंद्रे तथापशकुनादिषु ॥३३॥ पौषादिचतुरो मासान्वृष्टिः प्रोक्ता त्वकालजा ॥ गर्भयोगं विना नैष्कानूनं पशुप

दांकिता॥ पौषेदिनत्रयंवर्ज्यंमाघेत्वाद्यिकेद्वये॥ फाल्गुनेदिनमेकंतुचैत्रेतुघटिकाद्वयं॥३५॥ यायान्ताकालसंभूतैर्वि
द्युद्वर्षणगर्जितैः॥ त्रिविधैरपिचोत्पातैर्दूषैरासप्तरात्रतः॥३६॥ परिघापनजादोषामतपक्षाद्यस्तथा॥ ज्ञेयाग्रंथांतराद्
त्तेनोक्ताविस्तरभीततः॥३७॥ मितेसमंवृहत्संज्ञंप्रयाणंत्रिविधंचतत्॥ त्रिभेदंरणजंपापंपैत्र्यंचाम्पजलोद्भवं॥३८॥ अर्क
योजनकाकस्मान्निम्नमात्रलतामसं॥ नद्वर्षंचवृहद्यानेवुधैःखंडावधिःस्मृता॥३९॥ योगिकालफलाद्यादोषाःपंचांगजा
स्तथा॥ सितेस्या[illegible]ःमार्द्दूलमदोषागमेसमे॥४०॥ योगयात्रोद्भवादोषाःसर्वेत्याज्यावृहत्क्रमे॥ रणादकेग[illegible]पीत्यंवृह(
न्मितेचसंमिते॥४१॥ श्रुतिहस्तादितिद्वंद्वैमैत्रेंद्वर्काश्विपौष्णभैः॥ श्रेष्ठायात्रातुमध्यंद्वमूलपूर्वीवुपस्थिरैः॥४२॥ जलयात्रा(
चयात्रोक्तैःशुभर्क्षैःसजलांवुभैः॥ सितेंदुगुरुवारेषुश्रेष्ठाजलचरोदये॥४३॥ षष्ठ्यष्टमीद्वादशीचरिक्तामावर्जितासुच॥
यात्रासुत्क्रप्रतिपदिनिधनायधनायच॥४४॥ परस्त्रीद्विजदेवांशेनस्पृशेद्विगजाश्वकान्॥ हन्यान्नरिपुंप्राप्तस्त्वात्तान्भी
तान्निरायुधान्॥४५॥ इतिश्रीमहृदांगरायात्मजनंदिकेश्वरविरचितेगणकमण्डनेदिनरात्रिक्षणयात्राप्रकरणंचतुर्थोध्यायः
॥ ॥जन्मर्क्षतिथिमासेषुज्येष्ठेज्येष्ठस्यनोत्सवः॥ षण्मासान्तिकेगर्भस्यव्रतोद्वाहौचमुण्डनं॥१॥ विपरीतद्दलेकेविजन्मभा
दिकेष्वपि॥ शुभंप्राकृत्सदान्नाद्यप्रवेशादिकजन्मनोः॥२॥ व्रतादावाद्यषड्गिस्थोजीवोपीष्टोवनात्समकात्॥ शुभोपिकाले

नी४

16

रामः
१६

त्तुर्याष्टमव्ययस्थो हि गुरुणार्चनात्॥ ३॥ झषचापकुलीरस्थो जीवस्त्वशुभगोपि च॥ अतिशोभनतां दद्याद्विवाहोपनयादिषु॥ ४॥
जन्मभादष्टमे सिंहे नीचे वा शत्रुभे गुरौ॥ मौंजीबंधः शुभश्चैत्रे मीनेर्के वातिकालतः॥ ५॥ गर्भाष्टमेष्टमे वाब्दे ब्राह्मणस्योपनायनं
॥ राज्ञामेकादशे चैव वैश्यस्य द्वादशे स्मृतं॥ ६॥ अथ काम्योपनयनं॥ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे॥ राज्ञो बलार्थिनः
षष्ठे वैश्यस्यार्थार्थिनोष्टमे॥ ७॥ सप्तमे चाष्टमे वर्षे नवमे दशमे तथा॥ एकादशे के वर्षे वा ह्युपनेया द्विजातयः॥ ८॥ ब्रह्मवर्चसमा
युष्यं तेजोन्नाद्यं तथेंद्रियं॥ पशून् कामयमाना वै प्राप्नुवंति यथाक्रमं॥ ९॥ आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते॥ आद्वावि
शात्क्षत्रबंधोराचतुर्विंशतेर्विशः॥ १०॥ अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृताः॥ सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः॥ १
॥ इति त्रैवर्णिके काम्योपनयनं॥ ॥ विनर्तुना वसंतेन कृष्णपक्षे गलग्रहे॥ उपनीतस्त्वनध्याये पुनः संस्कारमर्हति॥ १२॥ पक्ष
द्वये चतुर्थी च सप्तम्यादि दिनत्रयं॥ त्रयोदशीचतुष्कं च व्रते नेष्टा गलग्रहाः॥ १३॥ माघादिपंचमासेषु मौंजीबंधनमिष्यते॥ शु
क्लपक्षे शुभं प्रोक्तं कृष्णे चांत्यत्रिकं विना॥ १४॥ पूर्वाह्णस्तत्रयेशादिश्रुतिमूलेध्रुव ह्व वां॥ धनुर्मापौष्णमैत्रार्कादितिपुष्यमृदुध्रु
वैः॥ १५॥ सामगानां हरिशार्कवसुपुष्योत्तराश्विभैः॥ वस्वश्वदितिमैत्रार्कसौम्यपौष्णैस्त्वथर्वणां॥ १६॥ गुरुशुक्रकुजज्ञाश्च शाखेशा
बह्वृचः क्रमात्॥ गुरुशुक्रौ कुजौ केचिच्चंद्रो ज्ञो वर्णपास्तथा॥ १७॥ अस्तं शस्तं च शाखेशे वर्णेशे च बलान्विते॥ सर्वेषां वा गुरौ चंद्रे सूर्ये

चवलशालिनि॥१८॥सर्वेषांजीवशुक्रज्ञवाराःप्रोक्ताव्रतेशुभाः॥चंद्रादित्यौव्ययेत्तद्वत्तनौमन्दौसुतेखलाः॥१९॥मौंजीवंधनमो
क्षौचज्ञारशुक्रेन्यवासरे॥हस्तत्रयेंदुयुग्मेज्ञेश्रुतियुग्मेदितिद्वये॥२०॥इतित्रैवर्णिकसाधारणनक्षत्राणि॥चरलग्ने
वटोर्यात्राव्रतमेवनिजालयात्॥पठनायजमावाद्यैर्मतुलेनागमःपुनः॥२१॥इत्युपवित्तोत्तरेवटुयात्रा॥ ॥इतिश्रीमद्दे
वांगरायात्मजनंदिकेश्वरविरचितेगणकमण्डनेमौंजीवंधमोक्षांतंपंचमोऽध्यायः॥ ॥वर्णामीनाद्योमीनाद्दुरेवर्णा
धिकेशुभं॥अज्ञाभक्षाअसिंहास्तुवश्याःसर्वेहरेर्वलिः॥१॥वरुणाश्विभयोरश्वोगजःस्याद्याम्यपौष्णयोः॥पुष्यकृ
त्तिकयोर्मेषःसर्पस्तुवास्मसौम्ययोः॥२॥योनिर्मूलार्द्रयोःश्वास्याद्विडालोदितिसार्पयोः॥पूफामघर्क्षयोराखुर्गौरुफो
त्तरभाद्रयोः॥३॥चित्राविशाखयोर्व्याघ्रोमहिषःस्वातिहस्तयोः॥पूषाश्रुत्योःकपिःप्रोक्तोज्येष्ठानुराधयोर्मृगः॥४॥
विश्वर्क्षाभिजितोर्वभ्रूःसिंहःपूभाधनिष्ठयोः॥पशुपालकयोर्वीक्ष्यपदंपत्योर्नृपभृत्ययोः॥५॥गोव्याघ्रमश्वमहिषं
श्वैनंवभ्रूरगंत्यजेत्॥वानराजंचसिंहेभंवैरमाखुविडालकं॥६॥रवेःसितार्कजौशत्रूज्ञःकुजस्यविदःशशी॥गुरोःकविज्ञौ
सूर्येदूभृगोरर्काज्ञयःशनेः॥७॥वृषालिमीनायुतेकर्केमिथुनेकुंभसंयुते॥मकरेकन्यकायुक्तेनकुर्यान्नवपंचकं॥८॥

17

रामः
१७

नृकन्ययोर्द्वयोराश्योर्यो राशिर्विषमे भवेत्॥ तस्मात्षष्ठं द्विकं त्याज्यं सिंहः कन्यान्वितः शुभः॥९॥ पूर्वोत्तराभरण्यार्द्रारोहिणी मानु
षोगणाः॥ देवः स्वाती तु विश्वर्क्षं मैत्राश्व्यांत्यादितिद्वयं॥१०॥ ज्येष्ठाश्लेषावसुद्वंद्वं चित्राग्नीद्वीशमासुरः॥ सुरासुरे स्त्रवैरं स्याद
सुरैर्मानुषं त्यजेत्॥११॥ स्यात्पंचकमोत्क्रमान्नाद्या मध्विन्याधं त्रिकं त्रिकं॥ पुंस्त्रीभं चैकगं नेष्टं शुभं चैकर्क्षराशिगं॥१२॥ क
न्यक्षोऽगणे ये घा वहुर धिस्यावधिकं मतं॥ ताराः सुर्नवहृच्छेषे शुभा ह्यत्रीषु वर्जिताः॥१३॥ योनिनाडीगणानां च मु
ख्यासद्वासिकूटकं॥ युक्तश्चेत्षंगुणाभावे खेटमैत्र्या भवेच्छुभं॥१४॥ इति मेषविचारः॥ श्रुतिपूर्वाधनिष्ठर्क्षैः सुलग्ने वा वि
वाहभैः॥ चंद्रतारावलेकन्यां वृणुयाच्च फलादिभिः॥१५॥ इति कुमारीवरणं॥ माघफाल्गुनवैशाखज्येष्ठाः श्रेष्ठाः करग्र
हे॥ मार्गोर्जौ मध्यमौ कैश्चिदिष्टस्त्यंशः पुचैरपि॥१६॥ युग्मे वर्षे जन्मतः स्त्रीणां विवाहो युग्मको नृणां॥ अर्केज्ययोर्नृनार्यो
श्चंद्रमादिंदोर्द्वयोर्वलं॥१७॥ इति चंद्रगुर्वादिवलं॥ मूलादिसोर्मघाश्लेषो विश्वेंदोः स्याद्दुफांत्ययोः॥ उभार्कयोः
कपित्रासोर्वेधः स्यान्मित्रयाम्ययोः॥१८॥ वेधश्चाद्यंतयोरओरन्योन्यं द्वितृतीययोः॥ क्रूरैरपि सजेत्पादं केचिदूचुर्मनीषि
णः॥१९॥ इति वेधः॥ अग्नेर्को द्वादशं भं च तृतीयं क्षितिनंदनः॥ नवसं खांतमो हंति लत्तया शनिरष्टमं॥२०॥ इति लत्ता॥ लत्तै
कार्गलवेधं चक्राति साम्यं हलायुधोऽष्टयोगांश्च पर्वोक्तान् सक्ष्मलग्ने हि वर्जयेत्॥२१॥ ब्राह्म्यपौष्णोत्तरामैत्रस्वातिसौम्य

करैः शुभैः ॥ समूलभैरविद्धितैर्विवाहः स्यान्मृगीदृशां ॥२२॥ त्याज्यालग्नेब्धयो मंदात्षष्ठे शुक्रेंदुलग्नपाः ॥ रंध्रज्ञात्तपंचलग्ने
शाः सर्वेस्तेब्जगुरू समौ ॥२३॥ सायनांशरवेर्भोग्यं निशिषड्राशिसंयुतात् ॥ भुक्तंसायनलग्नस्य कालः स्यात्सांतरोदयः ॥२४
॥ मेषनक्रतुलाकर्कीदंशाद्याह्या अजादितः ॥ तुलान्द्युग्मकन्यांशाः फाकचापार्द्धचसौख्यदा ॥२८॥ क्रूरस्योरंतरं त्याज्यंलग्नंच
चंद्रं च सप्तमं ॥ अंशपापैर्युग्वर्गश्चांशयोस्तोप्यहष्टिदः ॥२९॥ केलिरंकांतिसाम्यं च मूर्त्तिषष्ठाष्टगो विधुः ॥ विष्टिवेधौ चसं
त्यान्यौ गोरजं च विवाहभैः ॥३० ॥ विवाहांगं विवाहर्क्षैः कार्यं मिंडु वलेपि च ॥ वर्णकादि विवाहार्वाक् त्रिषट्नवदिने शुच ॥२७ ॥
सौम्यायने विवाहर्क्षैः स्कंदपे वांग शुद्धितः ॥ राजा नक्तमुखे खड्गं विधिना मंगलं चरेत् ॥२९॥ इति खड्गविचारः ॥ पुनर्भूवरणं
प्रोक्तंराज्ञोशंकरजादिषु ॥ पट्सुच्चै विवाहर्क्षैः शुद्धे दोज्ञादिके वर्जिते ॥३०॥ वेदे४ शर११ धृति१८ तत्वानि२५ सूर्यभानपदभानि
च ॥ गांधर्वासुरपैशाचराक्षसेषु विचिंतयेत् ॥ ३१॥ इति पुनर्भूवरणं ॥ कुंभाजालिगतेर्के च ध्रुवाक्षिप्रे दिनौ श्रुतौ ॥ चित्राद्वयांत्युपेमि
त्रे शुद्धे द्विः स्याद्विरागमः ॥३२॥ इति द्विरागमः ॥ मृदुक्षिप्रध्रुवैः श्रोत्रवसुमूलमघानिले ॥ विशेत्कुत्रेज्यमंदेज्ञनवोढा स्वपतेर्गृहे ॥
२ व ३३ ॥ इति वधूप्रवेशः ॥ ॥ इति श्रीमहद्दांगरायात्मजनंदिकेश्वरविरचितेगणकमंडने विवाहमेखलादि वधूप्रवेशांतं षष्ठोध्या 18
यः ॥ ॥ मृद्वकेन्द्रे ध्रुवे स्वातौ गृहारंभो वसुद्वये ॥ श्रावणे मासि वैशाखे फाल्गुने पौषमार्गयोः ॥१॥ पूर्वापरास्यगेहानि स्यु राम १८

र्येस्तूर्येन्दुमंदभे॥ याम्योत्तरामुखानिस्युर्भौमशुक्रज्ञभैरवौ॥२॥ सिंहादित्रितये सूर्येवायौकार्यंत्र मेशिवे॥ खातंकुंभत्रयेवह्नौनैऋ
त्यांचवृषत्रये॥३॥ खातंशिलाविधौवक्ष्येनृपसेवसद्दाघुमुस्तुखैः॥ द्वारायंपार्श्वभैः स्तंभस्वारभैर्क्षैर्विपंचकैः॥४॥ कूर्म्माकोत्रितयंव
त्सरस्तमश्वात्रत्रयंत्रयं॥ पूर्वादिक्रमशोद्वारेवर्जनीयोनुसन्मुखो॥५॥ इतिवत्सराहुप्रकरणं॥ एकादशयवाहूर्द्धंयावद्वात्रिंश
हस्तकं॥ तावदायादिकंचिंत्यंतदूर्द्धंनैवचिंतयेत्॥६॥ ग्रंथविस्तारभीत्यात्रनोक्तमायव्ययादिकं॥ राशिकूटादिकंसर्वंदंपत्योरव
चिंतयेत्॥७॥ चरलग्नेष्टमेक्रूरेलग्नाष्ठांत्यारिगेविधौ॥ रिक्तामारार्कवारेचगृहारंभप्रवेशकौ॥८॥ इतिगृहादिकृत्यं॥ स्थिरोदयेसु
धालेपदृष्टिकारंभणंतथा॥ गुर्वर्कार्किदिनेपोष्णेस्तुतिक्षिप्रध्रुवेंद्रभैः॥९॥ इतिसुधालेपदृष्टिकारंभौ॥ चित्रलेखस्तुनंदासु
मृदुक्षिप्रचरांबुभे॥ धांतृमेसुदिनेशस्तत्सप्त्वारामायणंगृहे॥१०॥ इतिचित्रलेखः॥ सदेहलिं -- स्याद्यंगृहेचोपस्करंस्य
सेत्स्थितिर्महानसादेश्चतिथ्येशाकोभ्यजास्थिरैः॥११॥ इतिनूतनगृहोपकारेस्थितिः॥ प्राकारपत्तनग्रामनिर्माणेसूत्रसा
धनं॥ गृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैःशुभोदये॥१२॥ इतिप्राकारपत्तनाद्यारंभः॥ सर्वदेवालयारंभोगृहारंभोक्तवारभैः॥ विश्वादि
त्याश्विनीयुक्तैर्मठेनाप्यदितौशुभो॥१३॥ इतिदेवालयमठारंभः॥ जैनालयप्रपादर्यारचनंचशुभेहनि॥ पूर्वात्रयार्द्रभेभाग्यपरे
हिपांचस्थिरोदये॥१४॥ इतिजैन्यालयप्रपादर्यारचना॥ अकपाटमनाछन्नमदत्तबलिभोजनं॥ गृहंनप्रविशेद्धीमानाप

दामाकरं हितत्॥१५॥ माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः॥ प्रवेशो मध्यमो ज्ञेयो मार्गकार्त्तिकमासयोः॥१६॥ अश्वि
४ वेद४ त्रि३ वेदा४ श्वि४ वह्न्य३ क्षीण२ पर्क भात्क्रमात्॥ वृषे सोख्यं भयं शांतं शं सखं स कलिं भयं॥१७॥ कु१ वेद४ पंच पर्क
त्रि३ खि३ सूर्यभाद्घाटचक्रके॥ कदिक्ष्वंतगले पापो नवाद्यंतरभान्न्यसेत्॥१८॥ लग्नात् प्रागादितो दिक्षु द्वौ राशी विनियोज
येत्॥ एकमेकं न्यसेत्कोणो सूर्यवामं विमं चयेत्॥१९॥ प्रवेशे नवगेहादावपूर्वं इति कथ्यते॥ प्रयाणांते सपूर्वः स्याद्दहद्वा भयो
न्यद्धुच्यते॥२०॥ शुभोः पूर्वप्रवेशः स्यादारभर्क्षैः करोज्झितैः॥ साश्विमूलाच्युतैरन्यः सपूर्वस्तु मृदु ध्रुवैः॥२१॥ श्रुतित्रये ध्रुवक्षै
चमृदु स्वातिकरेज्यभोनव्यदुर्गे पुरे वादौ विशेद्दिक्षाखजितैः॥२२॥ पूर्वाभाद्रोत्तराषाढाकृत्तिकाश्च विशाखभे॥ जीवार्कशनिवा
रेषु जितारिः पुरमाविशेत्॥२३॥ इति श्रीमहेदांगरायात्मजनंदिकेश्वरविरचिते गणकमण्डने गृहाद्यारंभः सप्तमोध्यायः॥ ॥
राद्धिंदुतुल्यकोणोस्मिन् यत्र स्यात्प्रपदोनका॥ नाद्यः प्रतिपदो नैवेदोदर्शनं नान्यथा भवेत्॥१॥ इति चंद्रदर्शनं॥ स्वाद्यहीनं
दिनञ्चेष्टं वहृतं गलनृभांतरं॥ गजाघ्नं तलवेदघ्नं दिनघुन्नं घुन्नाडिका॥२॥ इति दिनघटीज्ञानं॥ स्वमध्याद्रविभं यावत्संख्यं तत्तुल्यगो
नितं॥ नखघ्नं नवभिर्भक्तं लब्धं कोदयनाडिका॥३॥ इति रात्रिघटीज्ञानं॥ सूर्यनंशुजोहि विज्ञेयो भाद्वाद्वीनं त्रयाधिकं॥ भाद्वाधि
कं विभार्द्धं स्याट् र्कहीनं नवाधिकं॥४॥ इति धुजज्ञानं॥ शाके क्षात्रियुगेहीने द्व्ययनांशाः कलाधिकाः॥ सुः पंचविकला

19

रामः
१९

योन्यागतमासगुणामधोः॥५॥ इति क्षयनांशज्ञानं॥ मेषसंक्रांतिकालात्प्रागयनांशमितैर्दिनैः॥ मध्याह्नेनरभा पात्तुसार्कभापरि
कीर्त्तिता॥६॥ दशाघ्नदशनिघ्नीशाखिभक्तात्स्यापतिग्रहैः॥ चरखण्डाभिन्नानी यात्रखण्डैः केपरमं चरं॥७॥ अयनांशाघ्रभानोस्वभुज
गेहमित्तैक्यकं॥ भोग्यखण्डांशघातात्तु त्रिंशाप्तं च स्मृतं चरं॥८॥ सौम्यचरपलैर्नाड्योयुताहीनाश्चरेन्द्वः॥ द्युदलं च दिनार्द्धं च या
म्यगोले विलोमजं॥९॥ इति दिनरात्रिज्ञानं॥ गजर्क्षैः २७८ रंकगोदस्रैः २९९ रामदंतैः ३२३ स्त्रिदंतकैः ३२३॥ गोंकाश्विभि २९९ गजर्क्षैः
स्तुः पलैर्लंकोदयाः क्रमात्॥१०॥ चरखण्डैः स्वदेशोत्थैर्विहीनाढ्याः क्रमोत्क्रमैः॥ स्वदेशीयअजाद्यास्तेस्युर्विलोमास्तुलादितः॥
११॥ इति लग्नपलज्ञानं॥ ॥श्रीमद्गुर्जरदेशेस्ति विप्रवृंदविभूषितं॥ श्रीस्थलाख्यपुरं रम्यं पुरहूतपुरोपमं॥१२॥ तत्रासीच्छ्रुति
शास्त्रज्ञोरत्नाभट्टाह्वयो द्विजः॥ तज्जः श्रीनिगलाभट्टः सर्वविद्यामहोदधिः॥१३॥ तत्पुत्रो मज्जलित्तज्ञो वेदवेदांगपारगः॥ येन वे
दांगरायेति प्राप्तं दिल्लीश्वरात्पदं॥१४॥ पितृभक्तिरतः प्राज्ञस्तत्सुतो नंदिकेश्वरः॥ द्विजप्रीत्यै व्यधात्पूर्णं ग्रंथं गणकमण्डनं॥१५
॥ज्योतिर्निबंधमखिलं चतथासुवृत्तैश्चिंतामणिं गणकमण्डनरत्नमाले॥ ज्योतिर्विदाभरणमज्ञनवल्लभाख्यौ दृष्ट्वा त्रिविक्रमशता
दिमयेदमुक्तं॥१६॥ ॥इति श्रीमद्वेदांगरायात्मजनंदिकेश्वरविरचिते गणकमण्डने गणितादिक्रियानामाष्टमोध्यायः॥ ॥